CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

BRAHMANHIKAM.

3558

A BOOK

CONTAINING VALUABLE SELECTIONS

ON

Adwaita Philosophy.

BY THE LATE

Srimad Paramahamsa Parivrajakacharyavarya

UDEVA BRAHMENDRA SARASVATI SWAMIGAL.

PUBLISHED BY

KOZHUKUTHI S. NATESA AYYAR,

RETIRED ENGINEER,

MADURA.

ANANDA SAGARA PRESS,

MAYAVARAM.

1932.

PRICE G A[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

॥ श्री गु रु भ्यो न मः ॥

॥ ब्र ह्मा हि क म् ॥

श्रीमत्परमहंस परिव्राजकाचार्य
श्री वा सु दे व ब्र ह्मे न्द्र स र स्व ती
ग्रथितम् ।

मायूरपुरस्थाङ्ग्लविद्याशालागीर्वाणभाषाध्यापकेन
कृष्णशास्त्रिणा परिशोधितम् ।

रिटयर्ड् इञ्जिनियर्,
यस्. नटेश शर्मणा प्रकाशितम् ।

मायूरक्षेत्रस्थ आनन्द सागर मुद्राक्षरशालायां
मुद्रितम् ।

१९३२.

मूल्यम्] [षट् कलाः.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमत्परमहंस परिव्राजकाचार्य

श्री वा सु दे व ब्र ह्मे न्द्र स र स्व ती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

॥ श्रीगुरुभ्यो नमः ॥

॥ भूमिका ॥

सत्यं ज्ञानमनन्तं प्रत्यगभिन्नं स्वयंप्रभं ज्योतिः ।
आनन्दात्मकमजरं निखिलजगद्धेतुमाश्रये ब्रह्म ॥

इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमः पुरुषार्थ इति सर्वैरप्यभ्युपगतः । स च मोक्षो ब्रह्मज्ञानादेव सिद्ध्यति नान्यस्मादिति निखिलश्रुतिस्मृतीतिहासपुराणब्रह्मसूत्रादिग्रन्थेषु सुस्पष्टं निरूपितः । तादृशब्रह्मज्ञानं च श्रौतस्मार्तकर्मानुष्ठानेन श्रुतिप्रतिपादितमन्त्रोपासनेन च संजायत इति च प्रतिपादितम् । उपासनं च मानसं कर्मैव । अत एव भगवता गीतायां ' लोकेऽस्मिन् द्विविधा निष्ठा ' इत्यादिभिः श्लोकैः सांख्ययोगः कर्मयोग इति द्वे एव निष्ठे निरूपिते । तादृशसांख्ययोगसाधनीभूतकर्मानुष्ठाने उपासने चातीव प्रेम्णा भाव्यमिति प्रेमापरनामकभक्तिशब्देन ' पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ' इत्यादिभिश्श्लोकैः प्रतिपादयांचक्रे । अतस्तादृशसांख्ययोगसाधनीभूतानां श्रौतानां स्मार्तानाञ्च कर्मणामनुष्ठानेन वीतकल्मषेभ्यो मुमुक्षुभ्यः परिपूतान्तःकरणेभ्यो द्विजेभ्यो महत्या करुणया श्रीमद्वाल्मीकिमहामुनिप्रणीतोत्तररामायणापरनामकात् श्रीरघुनाथं निमित्तीकृत्य श्रीमद्वसिष्ठमहर्ष्युपदिष्टात् ज्ञानवासिष्ठाख्यग्रन्थात् श्रीमद्बादरायणाचार्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रगीतायास्सूतसंहितायाः भगवद्गीतायाश्च परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पूज्यपादकृतोपदेशसहस्र्यादिप्रकरणग्रन्थेभ्यः चतुर्वेदभाष्यकृद्भिः परमहंसपरिव्राजकाचार्यैश्श्रीमद्विद्यारण्यस्वामिभिर्विरचितेभ्यः पञ्चदश्यादिप्रकरणग्रन्थेभ्यश्चात्यन्तसारतराणि अहन्यहनि कर्तव्यनित्यकर्मानुष्ठानवरतानुसन्धानयोग्यानि तत्त्वमस्यादिमहावाक्यार्थप्रतिपादकानि वाक्यान्येकीकृत्य ब्रह्माह्निकाख्यं ग्रन्थरत्नं परमहंसपरिव्राजकाचार्यैश्श्रीमद्वासुदेवब्रह्मेन्द्रसरस्वत्याख्यैः पाराशर्यवर्यैस्संग्रथितम् । निरन्तरमेतद्ग्रन्थवाक्यध्यानवशात्प्रतिबन्धकदुरितनिवृत्तिद्वारा मोक्षसाधकं ब्रह्मज्ञानं सौलभ्येन लभ्यते । तदेतत् स्वत एव महाशयानां विदुषां चेतसि स्फुरेत् । इति विस्तरशो न वक्तव्यम् ।

श्रीकावेरीतीरविलसच्छ्रीपञ्चनदक्षेत्रकृतजनिः सदाचारसम्पन्नः जनकसकाशादेवाऽधीतसकलविद्यः शमदमादिसाधनसम्पन्नः त्रैलिङ्गजात्यलङ्कारभूतो द्विजोत्तमः कश्चिदवर्तत । बाल्य एव तीव्रतरवैराग्यसम्पन्नोऽयं विप्रः कुटुम्बनिर्वहणासमर्थेष्वात्मजे स्वजायायां तद्रक्षणं कुटुम्बपरिपालनञ्चावस्थाप्य पञ्चविंशतिवयस्क एवातीव विरक्तिं प्रपन्नः तुर्याश्रममङ्गीकृत्य श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकृष्णानन्दसरस्वतीनामकमस्करिवर्यमुपाश्रित्य तैः बहुधा परीक्ष्य सन्तुष्टैः कृतोपदेशस्तत्कटाक्षवशादौपनिषदज्ञानसम्पन्नस्तैस्सह चिरमवस्थानेनानुभूतब्रह्मविद्यारसो गणपत्युपपदाग्रहारविराजमानमठमलङ्कुर्वाणश्चिरमवर्तत । मायूरक्षेत्रमध्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थकवेरकृपकन्यकातटस्थविश्वेश्वरालयसन्निधौ राजन्मठमध्यासीनास्तत्र तत्र सच्छात्रेभ्यः सांसारिकतापनिवर्तनक्षमं साधनं वैदिकं कर्मेवेति बहुधा उपदिशन्तो बहून् शिष्यान् सोमादिक्रत्वनुष्ठानतत्परान् विधाय अन्येभ्यश्शिष्यगणेभ्योऽनवरतं श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादविरचितप्रस्थानत्रयभाष्योपदेशं कुर्वाणाः तुरीयाश्रमनियमादिकं सर्वमप्याश्रमधर्मं यावज्जीवं यथाविध्यनुष्ठितवन्तः प्रमोदनामके हायने माघशुद्धपञ्चम्यां विदेहकैवल्यं प्रपेदिरे ।

यतिवर्योऽसौ गृहस्थाश्रमवासिनां सर्वेषां विशेषतस्सन्यासिनां च सर्वदा अनुसन्धानयोग्यं भवसागरतारकं ब्रह्माह्निकनामकं ग्रन्थरत्नं रचयामास ।

तस्यैतस्य ग्रन्थस्य मुद्रणविषये स्वामिनश्शिष्याग्रगण्यः मधुरानगरवास्तव्य उद्योगविरामसुखमनुभवन् (रिटयर्ड् इञ्जिनियर्) यल्लनटेश शर्मा द्विजवरो यावदपेक्षितद्रव्यवितरणेन सर्वेषामास्तिकानामनुमुक्षूणां ब्रह्माह्निकाख्यग्रन्थपारायणोपकारकरणेन सुकृतपात्रं विद्यते ।

अस्य ग्रन्थस्य परिशोधने प्रमादाद्यकिञ्चित्स्खलितं स्याच्चेत्तन्महाशयैस्सोढ्वानुग्राह्योऽयं जन इति सप्रश्रयमभ्यर्थये ।

आङ्ग्लविद्याशालागीर्वाणभाषाध्यापकः
श्रीकृष्णशर्मा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

। उपोद्घातः ।

बौद्धानामार्हतानाञ्च कल्पयामास वै हरिः ।
कापालिकादिवामान्तान्हरस्तन्त्रानथाकरोत् ॥ १ ॥

वात्स्यायनं लोकायतं चार्वाकं विधिना कृतम् ।
एवं त्रिमूर्तयश्चक्रुः पाषण्डस्थापकानि तु ॥ २ ॥

वर्णत्रयातिरिक्तानां तत्र दीक्षा प्रशस्यते ।
शुद्धतन्त्रेषु शैवेषु तथा पाशुपतादिषु ॥ ३ ॥

पाञ्चरात्रादितन्त्रेषु ब्राह्मसौरादिकेषु च ।
शुद्धेष्वप्येषु तन्त्रेषु त्रिवर्णो नैव दीक्षयेत् ।
वेदमार्गेष्वनर्हाश्चेद्दीक्षयेयुस्त्रिवर्णिनः ॥ ४ ॥
वसिष्ठः ।
शृणु त्वं नृपशार्दूल कौलिकानाञ्च चेष्टितम् ।
कलौ खलु भविष्यन्ति पाषण्डाः कौलिकाश्रयाः ॥ ५ ॥
राजा ।
जाने कथं महाभाग कौलिकान्मूढचेतसः ।
तेषां चिह्नं मम ब्रूहि यथा जानामि तत्त्वतः ॥ ६ ॥
वसिष्ठः ।
अन्तः कौला बहिश्शैवाः सभामध्ये तु वैष्णवाः ।
इति कौला भविष्यन्ति लोकसम्मोहकारिणः ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यतयश्च भविष्यन्ति कलौ कौलपरायणाः ।
आचरन्ति मुदा कौलं मठेषु प्रमदान्विताः ॥ ८ ॥

विहरिष्यन्ति मोहेन कौलमार्गावलम्बिनः ।
त्यक्त्वा लज्जामिमं लोक वर्तन्ते गोखरादिवत ॥ ९ ॥

अन्वेषयन्ति संहृष्टा उपभोगार्थमात्मनः ।
आमिषं प्रमदां मद्यं सूकरा इव विड्भुजः ॥ १० ॥

आत्मा सर्वत्र सम्पूर्णो निष्कलङ्को निरञ्जनः ।
चैतन्यरूपो विमलो विरजस्को विभुस्स्वयम् ।
गुणदोषैः प्रकृतिजैः कथं बाध्येत चिन्मयः ॥ ११ ॥

एक आत्मा हि सर्वेषां देहास्सर्वे च भौतिकाः ।
अतो नास्त्यात्मनो दोषो देहो देहेन युज्यते ॥ १२ ॥

देहसामान्यवत्त्वेन भूतसामान्यतोऽपि वा ।
देहे च देहसम्बन्धात्कथं दोषो भविष्यति ॥ १३ ॥

यो भुङ्क्ते विविधान्भोगान्यथेष्टं मनसा रुचीन् ।
स तु वै भाग्यवान्देहो नान्यथा सत्यमीरितम् ॥ १४ ॥

इतीहैव स्वर्गलोको नास्ति लोकान्तरं परम् ॥ १५ ॥

अस्ति चेल्लोकमपरमन्यग्रामगतस्य वै ।
गृहे दत्त्वान्नपानीयं किमु तृप्तिर्भविष्यति ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भोगोपयुक्तो यो देहस्स्वर्गस्तेनानुभूयते ।
भोगहीनस्य देहस्य नरकप्राप्तिरेव तत् ॥ १७ ॥

अतो वैषयिकान्भोगान्भजध्वं सर्वथा जनाः ॥ १८ ॥

यावन्नायाति मरणं यावन्नेन्द्रियविक्लवम् ।
तावदाशु हि भुञ्जध्वं विषयान्सुखसम्पदः ॥ १९ ॥

भोगस्यायतनं सिद्धं शरीरं पण्डितोत्तमाः ।
त्यक्त्वा कुलं जातिमानं भजध्वं सततं प्रियान् ॥ २० ॥

पीत्वा चैवागलं मद्यं रात्रौ भुक्त्वामिषं स्त्रियम् ।
प्रातरेत्य सभां ब्राह्मीं मध्ये तिष्ठन्ति दुर्भगाः ॥ २१ ॥

सङ्कराणाञ्च हीनानां वाममार्गं विदुर्बुधाः ।
वैनायके पाशुपते शैवे स्कान्दे च सात्वते ॥ २२ ॥

पाञ्चरात्रे तथा सौरे दीक्षयेयुश्च पादजान् ।
त्रिवर्णबान्धवास्सर्वे श्रुत्यामनधिकारिणः ॥ २३ ॥

श्रुतिपथगलितानां मानुषाणां तु तन्त्रं
गुरुगुरुरखिलेशः सर्ववित्प्राह शम्भुः ।
श्रुतिपथगलितानां मानुषाणां तु तन्त्रं
हरिरपि मुनिमुख्याः प्राह तन्त्रे स्वकीये ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हरहरिविधिपूजा कीर्तिता सर्वतन्त्रे
श्रुतिपथनिरतानां यद्वदुक्ता तु पूजा ।
श्रुतिपथगलितानामेव तन्त्रोक्तपूजा
श्रुतिपथनिरतानां सर्ववेदोदितैव ॥ २५ ॥

दीक्षितानां तु तन्त्रेषु नराणामङ्कनं द्विजाः ।
वेदमार्गैकनिष्ठस्तु मोहेनाप्यङ्कितो यदि ।
पतत्येव न सन्देहस्तथा पुण्ड्रान्तरादपि ॥ २६ ॥

वैदिकश्चापि तन्त्रेषु दीक्षितं न स्पृशेत्सदा ॥ २७ ॥

यथा वाराणसीतुल्या पुरी नास्ति श्रुतौ स्मृतौ ।
तथा वैदिकतुल्यस्तु नास्ति तन्त्रावलम्बिषु ॥ २८ ॥

ओदनेन समं भोज्यं यथा लोके न विद्यते ।
तथा वैदिकतुल्यस्तु नास्ति तन्त्रावलम्बिषु ॥ २९ ॥

वेदोक्तं तान्त्रिकास्सर्वे स्वीकुर्वन्ति द्विजर्षभाः ।
नोपजीवन्ति तन्त्रोक्तं वेदः साक्षात्सनातनः ॥ ३० ॥

मार्गान्तरोदिताचारात्स्मार्तो धर्मस्सुशोभनः ।
स्मार्ताच्छ्रौतः परो धर्मः श्रौताच्छ्रेष्ठो न विद्यते ॥ ३१ ॥

अतीन्द्रियार्थे धर्मादौ शिवे परमकारणे ।
श्रुतिरेव सदा मानं स्मृतिस्तदनुसारिणी ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

॥ श्रीगुरुभ्यो नमः ॥

॥ ब्रह्महिकम् ॥

यत्पादरेणुकलिलं सलिलं निपीय
मूकोऽपि मूकयति पण्डितमण्डलानि ।
सद्भागधेयमभितस्वपदप्रबोध-
निर्धूतमोहतिमिरं गुरुमानतोऽस्मि ॥ १ ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ २ ॥

योऽस्मिन्देहेत्वहमहमिति प्रत्ययालंबनस्स-
न्नास्ते नित्यं सकलकरणग्रामचेष्टा निदानः ।
साक्षात्पश्यन्विविधविकृतीः प्राणबुद्धीन्द्रियाणां
सोऽहम्प्रत्यङ्ङहमधिगतस्स्वात्मनाशुद्धबोधः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निद्राकल्पितदेशकालविषयज्ञात्रादि सर्वं यथा
मिथ्या तद्वदिहापि जाग्रति जगत्स्वाज्ञानकार्यत्वतः ।
यस्मादेवमिदं शरीरकरणप्राणाहमाद्यप्यसत्
तस्मात्तत्त्वमसि प्रशान्तममलं ब्रह्माद्वयं यत्परम् ॥ ४ ॥

आशा यस्य विलोकितेऽपि विषये नोदेति नाप्याग्रहो
ब्रह्मण्येव तदात्मना स्थिततया नाहंमतिर्ब्रह्मणि ।
नेदं कार्यमकार्यमित्यपि कथा बाह्यार्थसंभावना
जीवन्नेव स मुक्त इत्यभिदधे प्राचीनवाचा यमी ॥ ५ ॥

त्वं निर्विकल्पेन समाधिना स्वं
सर्वात्मकं वीक्ष्य विवेकदृष्ट्या ।
स्वात्मन्यशेषं प्रविलाप्य दृश्यं
पूर्णात्मना तिष्ठ सुखं विमुक्तः ॥ ६ ॥

साक्षिण्यशेषं प्रविलाप्य दृश्यं
तमद्वये ब्रह्मणि निष्प्रपञ्चे ।
ततस्स्वयं व्योमवदेव पूर्ण-
बोधात्मना तिष्ठति यस्स मुक्तः ॥ ७ ॥

निरञ्जने निर्विकारे निष्क्रियेऽसङ्गवस्तुनि ।
स्वात्मन्यारोपितं सर्वं स्वप्नवत्सर्वदा मृषा ॥ ८ ॥

अनादिकालीनदुरन्तवासना-
दोषेण दुष्टा पुरुषस्य बुद्धिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नानाविधं विश्वमिदं प्रसूते
स्वप्नादिवद्ब्रह्मणि केवलेऽद्वये ॥ ९ ॥

अविद्यमानोऽप्यवभासते द्वयो
ध्यातुर्धिया स्वप्नमनोरथौ यथा ।
तत्कर्मसङ्कल्पविकल्पकं मनो
बुधो निरुन्ध्यादभयं ततो भवेत् ॥ १० ॥

विषयाकारतापत्तिर्वृत्तेर्येन निवार्यते ।
विपश्चिता मनस्तेन निर्जितं नात्र संशयः ॥ ११ ॥

उन्मेषश्च निमेषश्च सुकरस्स्याद्यथा तथा ।
मनोजयोऽपि सुकरो विदुषस्त्वात्मवेदिनः ॥ १२ ॥

दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम्
संपन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः ॥ १३ ॥

मनोदृश्यमिदं द्वैतं यत्किञ्चित्सचराचरम् ।
मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते ॥ १४ ॥

आत्मसत्यानुबोधेन न संकल्पयते यदा ।
अमनस्तां तदा याति ग्राह्याभावे तदग्रहम् ॥१५ ॥

नारायणोऽहं नरकान्तकोऽहं
पुरान्तकोऽहं पुरुषोऽहमीशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अखण्डबोधोऽहमशेषसाक्षी
निरीश्वरोऽहं निरहञ्च निर्ममः ॥ १६ ॥

स्वयं ब्रह्मा स्वयं विष्णुस्त्वयमिन्द्रस्त्वयं शिवः ।
स्वयं विश्वमिदं सर्वं त्वत्तमादन्यन्न किञ्चन ॥ १७ ॥

मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपीन्द्रियैः ।
अहमेव न मत्तोऽन्यदिति बुध्यध्वमञ्जसा ॥ १८ ॥

इन्द्रियार्थभ्रमो जाग्रत्स्वप्नोऽन्तःकरणभ्रमः ।
सुप्तं तद्वासनाबीजं तुर्या मूर्तिस्तदन्विता ॥ १९ ॥

विशुद्धं ज्ञानमेवैकं मायया भासते त्रिधा ।
ग्राहकाद्यैर्यथा स्वप्ने यत्र संविक्रिया फलम् ॥ २० ॥

ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः ।
अर्थस्वरूपमज्ञानात्पश्यन्त्यन्ये कुदृष्टयः ॥ २१ ॥

ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् ।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणा ॥ २२ ॥

ज्ञानस्वरूपे मय्येव ज्ञेयं सर्वं प्रकल्पितम् ।
स्वप्नवत्सर्वदा नास्ति ज्ञानरूपोऽहमद्वयः ॥ २३ ॥

ज्ञानस्वरूपान्मत्तोऽन्यज्ज्ञेयं नैवास्ति किञ्चन ।
स्वप्नवज्ज्ञेयरूपेण मनोमायैव जृम्भते ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥ २५ ॥

यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः ।
तथा जाग्रत्प्रपञ्चोऽयं मयि मायाविजृम्भितः ॥ २६ ॥

ईक्षेत विभ्रममिदं मनसो विलासम्
दृष्टं विनष्टमतिलोलमलातचक्रम् ।
विज्ञानमेकमुरुधैव विभाति माया
स्वप्नस्त्रिधागुणविसर्गकृतो विकल्पः ॥ २७ ॥

ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः ।
तदेवार्थस्वरूपेण भ्रान्तिदर्शनतस्स्थितम् ॥ २८ ॥

बुद्धेर्जागरणं स्वप्नस्सुषुप्तिरिति चोच्यते ।
मायामात्रमिदं राजन्नानात्वं प्रत्यगात्मनि ॥ २९ ॥

मनस्सृजति वै देहान्गुणान्कर्माणि चात्मनि ।
तन्मनस्सृजते माया ततो जीवस्य संसृतिः ॥ ३० ॥

एकान्तस्थितिरिन्द्रियोपरमणे हेतुर्दमश्चेतस-
स्संरोधे करणं शमेन विलयं यायादहंवासना ।
येनानन्दरसानुभूतिरचला ब्राह्मी सदा योगिन-
स्तस्माच्चित्तनिरोध एव सततं कार्यः प्रयत्नान्मुनेः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लक्ष्ये ब्रह्मणि मानसं दृढतरं संस्थाप्य बाह्येन्द्रियं
स्वस्थाने विनिवेश्य निश्चलतनुश्चोपेक्ष्य देहस्थितिम् ।
ब्रह्मात्मैक्यमवेक्ष्य तन्मयतया चाखण्डवृत्त्याऽनिशं
ब्रह्मानन्दरसं पिबात्मनि मुदा शून्यैः किमन्यैर्भृशम् ॥

चेत्यसंवेदनाज्जीवो भवत्यायाति संसृतिम् ।
तदसंवेदनाद्रूपं समायाति समं पुनः ॥ ३३ ॥

क्रमेण युगपद्वैषा सृष्टिर्ज्ञेया यथाश्रुति ।
द्विविधश्रुतिसद्भावाद्विविधस्वप्नदर्शनात् ॥ ३४ ॥

प्राणे गते यथा देहः सुखं दुःखं न विन्दति ।
तथा चेत्प्राणयुक्तोऽपि स कैवल्याश्रयो भवेत् ॥ ३५ ॥

शुद्धो निरञ्जनोऽनन्तो बोधोऽहं प्रकृतेः परः ।
चेष्टमानमिमं देहं पश्याम्यन्यशरीरवत् ॥ ३६ ॥

नष्टे पूर्वविकल्पे तु यावदन्यस्य नोदयः ।
निर्विकल्पकचैतन्यं स्पष्टं तावद्विभासते ॥ ३७ ॥

तस्मान्न विज्ञानमृतेऽस्ति किञ्चित्
क्वचित्कदाचिद्द्विज वस्तुजातम् ।
विज्ञानमेकं निजकर्मभेदा-
द्विभिन्नचित्तैर्बहुधाभ्युपेतम् ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्नमयादेरस्मादपरं यदि नानुभूयते किञ्चित् ।
अनुभवितान्नमयादेरस्तीत्यस्मिन्न कश्चिदपलापः ॥ ३९ ॥

स्वयमेवानुभवत्वाद्यद्यप्येऽतस्य नानुभाव्यत्वम् ।
सकृदप्यभावशङ्का न भवेद्बोधस्वरूपसत्तायाः ॥ ४० ॥

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥ ४१ ॥

स्वप्नजागरिते सुप्तिं भावाभावौ तथा धियाम् ।
यो वेत्यऽविक्रियः साक्षी सोऽहमित्यवधारय ॥ ४२ ॥

घटावभासको दीपो घटादन्यो यथेष्यते ।
देहावभासको देही तथाऽहं बोधलक्षणः ॥ ४३ ॥

घटज्ञानं पटज्ञानं कुड्यादिज्ञानमेव यत् ।
तदेवात्मा परं ब्रह्म निर्विशेषं श्रुतेर्मतम् ॥ ४४ ॥

दृश्यन्नास्त्येव तद्यस्माद्द्रष्टा दृश्यं प्रकल्पितम् ।
स्वप्नवद्दृक्स्वरूपे हि मयि सर्वं प्रकल्पितम् ॥ ४५ ॥

प्रातीतिकत्वं वेदान्तसिद्धान्ते जगतस्स्फुटम् ।
अतस्सुप्तौ जगल्लीनं प्रबोधे जायते पुनः ॥ ४६ ॥

दृष्टिसृष्टिमिमां ब्रह्मानुभवी बहु मन्यते ।
आकाशनैल्यवज्ज्ञातसत्तैका जगतो मता ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वैताभावाच्चिन्तनीयं स्वस्मादन्यत्किमस्ति भो ।
अतश्चिन्तां परित्यज्य सुप्तवत्सर्वदा भव ॥ ४८ ॥

बद्धो मुक्तो महाविद्वानज्ञ इत्यादिभेदतः ।
एक एव सदा भाति नानेव स्वप्नवत्स्वयम् ॥ ४९ ॥

अतस्त्वमुक्तयैवान्येषामाभासानामपि ध्रुवम् ।
मुक्तिं जानाति हे देव ह्यात्मना ह्यात्मविद्वरः ॥ ५० ॥

स्वसंसारदशायां तु स्वभ्रान्त्या सर्वदेहिनाम् ।
आभासानांच संसारं वेद मुक्तिं तथैव च ५१ ॥

गच्छन्तिष्ठन्स्वपञ्जाग्रन्निवसन्नुत्पतन्पतन् ।
असदेवेदमित्यन्तर्निश्चित्यास्थां परित्यज ॥ ५२ ॥

अस्त्यनन्तविलासात्मा सर्वगस्सर्वसंश्रयः ।
चिदाकाशोऽविनाशात्मा प्रदीपस्सर्वजन्तुषु ॥ ५३ ॥

अचेत्यचित्प्रकाशात्मा विज्ञानात्मा निरामयः ।
परमाकाशकोशाच्च शान्तसर्वभवभ्रमः ॥ ५४ ॥

कार्यकारणता ह्यत्र न किञ्चिदुपपद्यते ।
यादृगेव परं ब्रह्म तादृगेव जगत्त्रयम् ॥ ५५ ॥

येन बुद्धन्तु तस्यैतदाकाशादपि सूक्ष्मकम् ।
न बुद्धं येन तस्यैतद्वज्रसाराचलोपमम् ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वं हि मन एवेदमित्थं स्फुरति भूतिमत् ।
जलं जलाशयस्फारैर्विचित्रैश्चक्रकैरिव ॥ ५७ ॥

निखिलं दृश्यविशेषं दृग्रूपत्वेन पश्यतां तेषाम् ।
बन्धो नापि विमुक्तिर्न च परमात्मत्वमपि न जीवत्वम् ॥ ५८ ॥

घटवद्दृश्यभूतस्य शरीरस्य तु साक्षिणम् ।
चिद्रूपमात्मना पश्यन्कथं बध्येत कर्मभिः ॥ ५९ ॥

चेत्यानुपातरहितं सामान्येन च सर्वगम् ।
यच्चित्तत्वमनाख्येयं स आत्मा परमेश्वरः ॥ ६० ॥

ज्ञानमात्रमिदं सर्वं न ज्ञेयं विद्यते पृथक् [क्वचित्]।
स्वप्नादिज्ञानदृष्टान्तात्प्रत्यग्ब्रह्माद्वयत्वतः ॥ ६१ ॥

अहो नु चित्रं यत्सत्यं ब्रह्म तद्विस्मृतं नृणाम् ।
यदसत्यमविद्याख्यं तन्नूनं स्मृतिमागतम् ॥ ६२ ॥

को देवो यो मनस्साक्षी मनो मे दृश्यते मया ।
तर्हि देवस्त्वमेवाऽसि ह्येको देव इति श्रुतेः ॥ ६३ ॥

निस्सन्दिग्धा विपर्यस्ता देहेऽज्ञस्यात्मधीर्यथा ।
तद्वद्ब्रह्मात्मधीरस्य जीवन्मुक्तिरितीर्यते ॥ ६४ ॥

देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम् ।
आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते ॥ ६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मा क्षेत्रज्ञ इत्युक्तस्संयुक्तः प्राकृतैर्गुणैः ।
तैरेव च विनिर्मुक्तः परमात्मेत्युदाहृतः ॥ ६६ ॥

यदिदं दृश्यते किञ्चिद्दर्शनात्तन्न भिद्यते ।
दर्शनं द्रष्टृतो नान्यद्द्रष्टैव हि ततो जगत् ॥ ६७ ॥

आयासस्तावदत्यल्पः फलं मुक्तिरिहैव तु ।
तथापि परमाद्वैतं नैव वाञ्छन्ति मानवाः ॥ ६८ ॥

स्वायत्तमेकान्तहितं स्वेप्सितत्यागवेदनम् ।
यस्य दुष्करतां यातं धिक्तं पुरुषकीटकम् ॥ ६९ ॥

रात्रिघस्रौ सुप्तिबोधावुन्मीलननिमीलने ।
तृष्णींभावमनोराज्य इव सृष्टिलयाविमौ ॥ ७० ॥

श्रूयते दृश्यते यद्यत्स्मर्यते वा नरैस्सदा ।
असदेव हि तत्सर्वं यथा स्वप्नो मनोरथः ॥ ७१ ॥

अन्तःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः ।
आनन्दरूपस्सत्यस्सन् किन्नात्मानं प्रपद्यसे ॥ ७२ ॥

तस्माद्राम जगन्नासीन्न चास्ति न भविष्यति ।
चेतनाकाशमेवाशु कचतीत्थमिवात्मनि ॥ ७३ ॥

अत्यन्ताभाव एवास्य जगतो विद्यते यदा ।
तदा ब्रह्मेदमखिलमिति तद्राम नान्यथा ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नानाघटपटाकारैश्चेतस्स्थितिमुपागतम् ।
तदेवाशु शमं नेयं मिथ्यायक्ष इवोत्थितः ॥ ७५ ॥

श्रूयतां ज्ञानसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
भोगेच्छामात्रको बन्धस्तत्त्यागो मोक्ष इष्यते ॥ ७६ ॥

किमन्यैश्शास्त्रसन्दर्भैः क्रियतामिदमेव तु ।
यद्यत्स्वाद्विह तत्सर्वं त्यज्यतां विषवद्विवत् ॥ ७७ ॥

सर्वेषामेव भूतानां तिक्तकट्वादिवेदिनाम् ।
एकत्वादनुभूतेस्तु कुतश्चिन्मात्रभिन्नता ॥ ७८ ॥

न च तन्नाम वस्त्वस्ति यद्भूत्वा संप्रलीयते ।
आभासमात्रमेवेदं न सन्नासच्च राघव ॥ ७९ ॥

नित्यस्सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ।
एकस्सन्भिद्यते भ्रान्त्या मायया न स्वभावतः ॥ ८० ॥

तस्मादद्वैतमेवास्ति न प्रपञ्चो न संसृतिः ।
सोऽहं ब्रह्म न संसारी न मत्तोऽन्यत्कदाचन ॥ ८१ ॥

इति विद्यात्स्वमात्मानं स समाधिः प्रकीर्तितः ।
पश्यञ्च्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपंच्छ्वसन् ॥ ८२ ॥

प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निषन्नपि ।
अकर्ताहमभोक्ताहमसङ्गः परमेश्वरः ॥ ८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदा मत्सन्निधानेन चेष्टते सर्वमिन्द्रियम् ।
इति विज्ञानसंपन्नः संगं त्यक्त्वा करोति यः ॥ ८४ ॥

लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ।
नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् ॥ ८५ ॥

पश्यञ्छृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्छ्वसन् ।
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ८६ ॥

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमान् लोकान्न हन्ति न निबद्ध्यते ॥ ८७ ॥

जाग्रत्येव हि संसुप्तां भावयन्सुस्थिरां स्थितिम् ।
सर्वमस्मीति संचिन्त्य सत्तैकात्मवपुर्भव ॥ ८८ ॥

बहिर्न किञ्चिदप्यस्ति खाद्यत्व्युर्वीदिगादिकम् ।
एतत्स्वचित्त एवास्ति पत्रपुञ्जमिवांकुरे ॥ ८९ ॥

मनोनिष्ठतया विश्वमिदं परिणतिङ्गतम् ।
घटत्वेनेव मृत्पिण्डो धूमोऽम्बुदतयैव च ॥ ९० ॥

यदा संक्षीयते चित्तमभावात्यन्तभावनात् ।
संविन्मात्रस्वरूपस्य सत्तासामान्यता तदा ॥ ९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रेषु येषु पदार्थेषु मनो मज्जति बालवत् ।
तेभ्यस्तेभ्यस्समाहृत्य तद्धि तत्त्वे नियोजयेत् ॥ ९२ ॥

यो नित्यमध्यात्ममयो नित्यमन्तर्मुखस्सुखी ।
नित्यं चिदनुसन्धानो मनश्शोकैर्न बाध्यते ॥ ९३ ॥

व्यवहारपरोऽप्युच्चै रागद्वेषमयोऽपि सन् ।
नान्तः संश्लेषमाप्नोति पद्मो जलगतो यथा ॥ ९४ ॥

तानि मित्राणि शास्त्राणि तानि तानि दिनानि च ।
विरागोल्लासवान्येभ्य आत्मचित्तोदयः स्फुटम् ॥ ९५ ॥

सर्वमात्मेदमखिलं किं वाञ्छामि त्यजामि किम् ।
इत्यसङ्गस्थितिं विद्धि जीवन्मुक्ततनुस्थितिम् ॥ ९६ ॥

न बन्धोऽस्ति न मोक्षोऽस्ति कदाचित्कस्यचित्क्वचित् ।
सर्वमात्ममयं शान्तमित्येवं प्रत्ययं स्फुटम् ॥ ९७ ॥

सबाह्याभ्यन्तरं राम सर्वत्र दृढतां नय ।
सुखी दुःखी विमूढोऽस्मीत्येता दुर्दृष्टयस्स्मृताः ॥ ९८ ॥

आसु चेद्वस्तुबुद्धिस्ते तच्चिरं दुःखमिच्छसि ।
नास्त्यविद्येति संजाते निश्चये शास्त्रयुक्तितः ॥
गलत्यविद्यातापेन तुषारकणिका यथा ॥ ९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देहातीता महात्मानश्चिन्मात्रे स्वात्मनि स्थिताः ।
दूरादेहं समीक्षन्ते प्रेक्षको जनतां यथा ॥ १०० ॥

देहे दुःखातिसंक्षुब्धे का नः क्षतिरुपस्थिता ।
रथे विधुरिते भग्ने सारथेः केव खण्डना ॥ १०१ ॥

विचार्यार्यैस्सहालोक्य शास्त्राण्यध्यात्मभावनात् ।
सत्तासामान्यनिष्ठत्वं यत्तद्ब्रह्म परं विदुः ॥ १०२ ॥

स्वप्ने यथैकः पुरुषो देवर्तियङ्नरादितः ।
विवर्तते प्रबोधेन्यत्स्वस्मात्किञ्चिन्न विद्यते ॥ १०३ ॥

स्वात्ममात्रं विजानाति स्वाप्नक्षीवेश्वरं जगत् ।
एवमद्वैतसंपूर्णसच्चिदानन्दलक्षणम् ॥ १०४ ॥

जीवेशजगदाकाराद्भाति ब्रह्मैव विभ्रमात् ।
श्रवणादिभिरुद्दीप्तस्वात्मब्रह्मावबोधतः ॥
स्वयमेवेति तत्सर्वं भासते भ्रान्तिशान्तितः ॥ १०५ ॥

यथा दारु गजत्वेन नरत्वेन विवर्तते ।
यथाकाशस्तलत्वेन नीलत्वेन विवर्तते
तथा ब्रह्म जगत्वेनानादिभ्रान्त्या विवर्तते ॥ १०६ ॥

सैव भ्रान्तिरविद्या स्याद्विक्षेपावृतिरूपिणी ।
मूलप्रकृतिरित्येषा कीर्त्यतेऽनादिवासना ॥ १०७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्माऽसङ्गस्ततोऽन्यत्स्यादिन्द्रजालं हि मायिकम् ।
इत्यचञ्चलनिर्णीते कुतो मनसि वासना ॥ १०८ ॥

चिन्मात्रं यद्यदा भातं जलवाहविवर्तवत् ।
तत्तादृक्कथमन्याभमन्यस्यासंभवाद्भवेत् ॥ १०९ ॥

जागरस्वप्नसुप्तीनामागमापायभासनम् ।
यतो भवत्यसावात्मा स्वप्रकाशचिदात्मकः ॥ ११० ॥

यदेवाम्बु स आवर्तो न त्वस्त्यावर्तवस्तु सत् ।
द्रष्टैवास्ते दृश्यमिव दृश्यं न त्वस्ति वस्तु सत् ॥ १११ ॥

दुर्बुद्धिभिः कारणकार्यभावं सङ्कल्पितं दूरतरे व्युदस्य ।
तदेव तत्सत्यमनादिमध्यमगत्तदेतत्स्थितमित्यवेहि ॥ ११२ ॥

चिच्चेत्यकलनाबन्धस्तन्मुक्तिर्मुक्तिरुच्यते ।
चिदचेत्याऽखिलात्मेति सर्वसिद्धान्तसंग्रहः ॥ ११३ ॥

आत्मनो व्यतिरेकेण न किञ्चिदपि विद्यते ।
सर्वं ब्रह्मेति मे तत्त्वमेतत्तत्भावयाम्यहम् ॥ ११४ ॥

यावत्सर्वं न संत्यक्तं तावदात्मा न लभ्यते ।
सर्वावस्थापरित्यागे शेष आत्मेति कथ्यते ॥ ११५ ॥

बुद्धीन्द्रियार्थरूपेण ज्ञानं भाति तदाश्रयम् ।
दृश्यत्वाव्यतिरेकाभ्यामाद्यन्तवदवस्तु यत् ॥ ११६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न स्वप्नजाग्रन्न च तत्सुषुप्तन्न खञ्चलम्भूरनिलोऽग्निरर्कः ।
संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनन्ति ॥ ११७

संविदेव नृणाञ्जीवस्स यथा दृढभावनः ।
तथा सुखी वा दुःखी वा भवेदित्येष निर्णयः ॥ ११८ ॥

भ्रमस्य जागतस्यास्य जातस्याकाशवर्णवत् ।
अपुनस्स्मरणं साधो मन्ये विस्मरणं वरम् ॥ ११९ ॥

हरिर्यद्युपदेष्टा ते हरः कमलजोऽपि वा ।
तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते ॥ १२० ॥

उपदेशक्रमो राम व्यवस्थामात्रपालना ।
ज्ञप्तेस्तु कारणं शुद्धा शिष्यप्रज्ञैव केवला ॥ १२१ ॥

मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः ।
साऽसंप्रज्ञातनामाऽसौ समाधिरभिधीयते ॥

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ।
ता येनैवानुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥ १२३ ॥

मनोमयत्वात्सर्वेऽर्थाः स्वप्नजागरयोस्समाः ।
दृष्टा नष्टा अपि ध्यातुः शोकमोहभयप्रदाः ॥ १२४ ॥

बाह्यचिन्ता न कर्तव्या तथैवान्तरचिन्तना [चिन्तिका]।
सर्वचिन्तां परित्यज्य चिन्मात्रपरमो भव ॥ १२५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञेयवस्तुपरित्यागाद्विलयं याति मानसम् ।
मानसे विलयं याते कैवल्यमवशिष्यते ॥ १२६ ॥

अनन्तं बत मे वित्तं यस्य मे नास्ति किञ्चन ।
मिथिलायां प्रदीप्तायां न मे किञ्चन दह्यते ॥ १२७ ॥

ज्ञानाज्ज्ञेयं पृथङ्नास्ति ज्ञेयं ज्ञानात्मकं ततः ।
प्रत्यग्बोधेऽद्वये सिद्धे ज्ञेयोन्मेषादिकं कुतः ॥ १२८ ॥

यत्सामान्यविशेषाभ्यां उपलभ्येत स भ्रमः ।
अन्योन्यापाश्रयात्सर्वं आद्यन्तवदसत्खलु ॥ १२९ ॥

परागर्थप्रमेयेषु या फलत्वेन सम्मता ।
संवित्सैवेह मे योऽर्थो वेदान्तोक्तिप्रमाणतः ॥ १३० ॥

दृग्दृश्यौ द्वौ पदार्थौ स्तः परस्परविलक्षणौ ।
दृग्ब्रह्म दृश्यं मायेति सर्ववेदान्तडिण्डिमः ॥ १३१ ॥

ज्ञानज्ञेयपदार्थौ स्तः परस्परविलक्षणौ ।
ज्ञानं ब्रह्मैव तज्ज्ञेयं माया तस्मिन्प्रकल्पितम् ॥ १३२ ॥

देहेन्द्रियादावसति भ्रमोदितां
विद्वानहन्तां न जहाति यावत् ।
तावन्न तस्यास्ति विमुक्तिवार्ता-
ऽप्यस्त्वेष वेदान्तनयान्तदर्शी ॥ १३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतः प्राहुर्मनोऽविद्यां पण्डितास्तत्त्वदर्शिनः ।
येनेदं भ्राम्यते विश्वं वायुनेवाभ्रमण्डलम् ॥ १३४ ॥

वेदनं सुखदुःखादेर्यत्तत्प्रत्यक्चिदात्मकम् ।
तद्ब्रह्माहमिति ज्ञात्वा मुच्यतेऽत्रैव मा चिरम् ॥ १३५ ॥

नन्वविद्यावदिष्टश्चेद्ब्रह्म दोषो महानयम् ।
निरविद्ये च विद्याया आनर्थक्यं प्रसज्यते ॥ १३६ ॥

अस्याविद्येत्यविद्यायामेवासित्वा प्रकल्पिते ।
ब्रह्मद्वारा त्वविद्येयं न कथञ्चन युज्यते ॥ १३७ ॥

आकाशनैल्यवज्ज्ञेयं मयि भाति चिदम्बरे ।
कालत्रयेऽपि नास्त्येव वन्ध्यापुत्र इवात्मनि ॥ १३८ ॥

आत्मानैव भवेच्चिन्त्यो यतो वाच इति श्रुतेः ।
अनात्मापि तथैव स्यात्तुच्छत्वाच्छशशृङ्गवत् ॥ १३९ ॥

भूतभौतिकमायानामसत्त्वेऽत्यन्तवासिते ।
सद्वस्त्वद्वैतमित्येषा धीर्विपर्येति न क्वचित् ॥ १४० ॥

नरकादिव निर्विण्णो यावन्नाब्रह्मणो नरः ।
न तावदधिकारोऽस्ति कैवल्यज्ञानवर्त्मनि ॥ १४१ ॥

मय्यखण्डचिदालोके गवाक्षातपरेणुवत् ।
अण्डानां कोटयो भान्ति भ्रमात्त्वय्यादिदृश्यवत् ॥ १४२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्मान्तरमहाभाग्यवशादेवान्त्यजन्मनि ।
अहं ब्रह्मेति विज्ञाय मुच्यते नान्यथा भ्रमात् ॥ १४३ ॥

तृणादिविषयं ज्ञानं यत्तद्विषयवर्जितम् ।
तदेवाहं परं ब्रह्मेत्येष वेदान्तनिर्णयः ॥ १४४ ॥

सर्वं ब्रह्म विजानीयात्सर्वं पश्यति चात्मनि ।
आत्मा घटस्थचैतन्यमद्वैतं शाश्वतं परम् ॥ १४५ ॥

घटाद्विभिन्नतो ज्ञात्वा वीतरागं विवासनम् ।
एवं मिथः समाधिस्स्यात्सर्वसंकल्पवर्जितः ॥ १४६ ॥

उन्मन्यवस्थाधिगमायविद्व-
द्बुपायमेकं तव निर्दिशामि ।
पश्यन्नुदासीनतया प्रपञ्चं
सङ्कल्पमुन्मूलय सावधानः ॥ १४७ ॥

चिदाकाशात्मनो नैव निद्रालस्यसुखादयः ।
घटवद्दृश्यमानत्वादात्मनस्त्वद्वयत्वतः ॥ १४८ ॥

चितिरूपं स्वमात्मानं भजध्वं चेत्यवर्जितम् ।
नास्ति चेत्यञ्चितेरन्यद्दर्पणे प्रतिबिम्बवत् ॥ १४९ ॥

चितिश्चेत्यञ्चितिरहञ्चितिः सर्वञ्चराचरम् ।
यतः सर्वञ्चितिमनुभाति सा तु स्वतन्त्रतः ॥ १५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतश्चितिं जनास्सर्वभासिनीं सर्वसंश्रयाम् ।
भजध्वं भ्रान्तिमुत्सृज्य चितिमात्रसुदृश्यः ॥ १५१ ॥

रज्जुसर्पादिवद्विश्वं नाज्ञातं सदितिस्थितम् ।
प्रबुद्धदृष्टिसृष्ट्वात्सुषुप्तौ च लयश्रुतेः ॥ १५२ ॥

वन्ध्यापुत्रादिकं नैव चिन्तयेदबुधोऽपि हि ।
तत्तुल्यमनृतं द्वैतं विवेकीचेत्कथं स्मरेत् ॥ १५३ ॥

चिद्विलासः प्रपञ्चोऽयं न तु दुःखात्मको भवेत् ।
अपीन्द्रवारुणी राम सितया कटुकी भवेत् ॥ १५४ ॥
अज्ञस्य दुर्लभं ज्ञानमज्ञानं दुर्लभं विदः ।
दुःखायैवान्यथाज्ञानं तत्त्वज्ञानं सुखावहम् ॥ १५५ ॥

हरो वापि हरिर्वापि विधिर्वा दृश्यकोटिगः ।
मत्तो नान्योऽस्ति तुच्छत्वादद्वयत्वाच्चिदात्मनः ॥ १५६ ॥

प्रबुद्धस्वप्नदृष्टान्ययोगक्षेमं न चिन्तयेत् ।
जागरेपि तथा चेत्स्यादनायासेन मुच्यते ॥ १५७ ॥

अध्यारोपापवादाभ्यां जायते लीयते (बध्यते मुच्यते) मनः ।
न केनचिच्च संबन्धो ममत्वद्वैतचित्तनोः ॥ १५८ ॥

त्यक्त्वा देहाभिमानादि मृत्योर्नैव बिभेति यः ।
स एव मुच्यते बन्धान्नान्यो वेदान्तवेद्यपि ॥ १५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यक्चैतन्यमद्वैतं अशन्यादि भयानकम् ।
ब्रह्मैवेदमिदं सर्वं सर्वङ्खल्विति हि श्रुतिः ॥ १६० ॥

निर्विशेषश्चिदाकाशो बहिर्देहादिवान्तरः ।
इति निश्चित्य सुदृढं शून्यवत्सर्ववदा भव ॥ १६१ ॥

आन्तरस्वप्नवन्मिथ्या बहिर्जाग्रन्मनोमयः ।
नास्ति द्वैतं सदेत्येवं शुद्धाद्वैतं समाश्रय ॥ १६२ ॥

यच्चैतन्यमनुस्यूतं जाग्रत्स्वप्नसुषुप्तिषु ।
तदेव त्वमिदं तत्त्वमितो नास्त्यधिकं पदम् ॥ १६३ ॥

मायैव नास्ति चेद्दृश्यमितोऽन्यत्स्यात्कथं पृथक् ।
इति संवित्प्रत्यगात्मा समाधिस्स्यान्न चापरः ॥ १६४ ॥

देहाहङ्कारमूला हि सर्वानर्थपरम्परा ।
अतः प्रयत्नाज्ज्ञातव्यश्शनैश्शश्वद्दुरासदः ॥ १६५ ॥

नाहं देहो न मे देहस्साक्ष्यसङ्गश्चिदद्वयः ।
इत्येतत्प्रथमं सर्वसाधनानां यतो जनेः ॥ १६६ ॥

स्तम्भान्तराले सुस्पष्टं संविद्भाति यथा तथा ।
द्यावापृथिव्योर्मध्येपि स्वयं ज्योतिश्चिदम्बरम् ॥ १६७ ॥

अनात्ममात्रे यस्यास्ति ह्यरुचिर्मलमूत्रवत् ।
स एव तत्त्वं जानाति नान्यशास्त्रकुटग्रयः ॥ १६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेति नेतीति निखिलं निषिध्याशु प्रतिक्षणम् ।
चिद्घनानन्दरूपेण मुक्तिस्तूष्णीमवस्थितिः ॥ १६९ ॥

सुप्रसिद्धं सुसुलभं सुसुखं श्रुतिसम्मतम् ।
व्यवहारास्पदं ज्ञानं साक्षाद्ब्रह्मापरोक्षचित् ॥ १७० ॥

मातापित्रोर्मलोद्भूतं निन्द्यं दौर्गन्धिकं वपुः ।
कथमेतद्भवेदात्मा ह्यहो मोहस्य वैभवम् ॥ १७१ ॥

अणुमात्रमपि द्वैतं स्वान्यत्वेन विजानतः ।
उदरादिश्रुतिर्ब्रूते मरणादिमहाभयम् ॥ १७२ ॥

एकमेवाद्वयं ज्ञानं सुन्निवज्ज्ञेयवर्जितम् ।
इत्येवं सर्वदा स्वप्नेप्यनुभूय विमुच्यते ॥ १७३ ॥

अन्यत्र वित्तात्कान्तायाः विरक्तास्सर्व एव हि ।
तयोर्विरक्तो यः कश्चित्स्यान्न वेति तु संशयः ॥ १७४ ॥

तृणकीटादिदेवान्तचराचरविभेदतः ।
एकोऽपि बहुधा भामि मायया स्वप्नद्रष्टृवत् ॥ १७५ ॥

दृश्यमानमिदं सर्वं दर्शनाभासमेव हि ।
दर्शनादन्यवस्त्वेव वाचारम्भणतो न हि ॥ १७६ ॥

निद्राजाग्रन्मध्यभागे संविद्भेदान्तरे तथा ।
मध्ये संविद्द्वयोश्च सूक्ष्मबुद्ध्याभिलक्षय ॥ १७७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतत्पदं निजं रूपं यज्ज्ञात्वा न विमुह्यति ।
एतद्ज्ञानमात्रेण प्रबुद्धं जगदीदृशम् ॥ १७८ ॥

चित्ताकाशश्चिदाकाशमाकाशश्च तृतीयकम् ।
द्वाभ्यां शून्यतरं विद्धि चिदाकाशमिदं मुने ॥ १७९ ॥

देशादेशान्तरप्राप्तौ संविदोर्मध्यमेव यत् ।
निमेषेण चिदाकाशं तद्विद्धि मुनिपुङ्गव ॥ १८० ॥

कुदृष्टिशास्त्रगर्तेषु लुठतां नैव सद्गतिः ।
गुरूपदिष्टवेदान्तमहावाक्यादृतेऽन्यथा ॥ १८१ ॥

निःस्नेहोपनाशे मोक्षस्त्यादाशायास्सर्ववस्तुषु ।
नेतोऽन्यत्साधनं साक्षान्मुख्यं ज्ञानस्य सिद्धये ॥ १८२ ॥

परिभूतोऽपि यस्तोदुं क्षमते भिक्षुवत्त्रयम् ।
स्वप्नादिवन्मनःकार्यमिति मुक्तस्स निश्चयी ॥ १८३ ॥

तत्त्वज्ञानाज्ज्ञानमेव ज्ञेयवद्भाति लौकिकम् ।
अज्ञातसत्ता नैवास्ति ह्यसतो ज्ञेयवस्तुनः ॥ १८४ ॥

महावैराग्यसंपत्तेर्नान्यज्ज्ञानस्य कारणम् ।
चित्तशाखावलिप्तस्य नाणुमात्रविरक्तता ॥ १८५ ॥

विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यगवस्थितम् ।
सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ॥ १८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्यन्तमेव शून्यं सन्मनस्स्वप्नादिवन्मृषा ।
जाग्द्देशक्रियाकालवस्तुरूपेण भासते ॥ १८७ ॥

प्रकाश्यगुणदोषादि प्रकाशं नैव संस्पृशेत् ।
ज्ञेयस्य गुणदोषादि ज्ञानं नैव तथा स्पृशेत् ॥ १८८ ॥

शून्यं सर्वात्मना द्वैतमतोऽन्यन्नेति च श्रुतेः ।
सर्वोपनिषदाकूतं नान्यत्किञ्चिच्चिदात्मनः ॥ १८९ ॥

पारमार्थिकमद्वैतं नित्यं निरुपमं सुखम् ।
अत्यन्तदुःसहं दुःखं द्वैतं तुच्छं महानृतम् ॥ १९० ॥

दृश्यं शून्यं सदा विद्धि कामक्रोधाद्यसिद्धये ।
कामक्रोधादिविषयः को वा का किं कुतः क्व च ॥ १९१ ॥

तत्र को मोह इत्यादिश्रुत्या द्वैतनिषेधनात् ।
शून्यसाक्षी बोध आत्मा भूमानन्दश्चिदद्वयः ॥ १९२ ॥

अहं त्वं तदिति भ्रान्त्या त्वेकस्मिन्भेदकल्पनात् ।
कामक्रोधादिवशगो दुखं याति सुखाच्च्युतः ॥ १९३ ॥

माया नास्ति कथं सत्यं कार्यं वन्ध्यासुतादिवत् ।
शून्यमप्यवभासेत दृश्यं स्वप्नादिवन्मृषा ॥ १९४ ॥

शास्त्रपाण्डित्यमज्ञानवर्धकं न तु मोचकम् ।
वेदान्तगुरुवाक्येन कुर्याद्दृश्यस्य शून्यताम् ॥ १९५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनात्मविषय शास्त्रं कथमात्मावबोधकम् ।
गुरुवेदान्तभक्त्यैव ह्यात्मा ज्ञेयो न चान्यथा ॥ १९६ ॥

निमीलने यथा द्वैतं न किञ्चिदनुभूयते ।
उन्मीलने दृश्यमानमप्येवं नेति चिन्त्यताम् ॥ १९७ ॥

दृश्यमानमपि द्वैतं जातु स्वप्नादिवन्न हि ।
इति निश्चयदार्ढ्येन न पुनर्जायते मनः ॥ १९८ ॥

अध्यस्तमनसः क्वापि क्रिया काचिन्न संभवेत् ।
अधिष्ठानात्मसत्ताकमारोप्यं स्वाग्निकादिवत् ॥ १९९ ॥

ज्ञानमेकं सदा सत्यं ज्ञेयं शून्यं सदेति तु ।
अनुक्षणमविश्रान्तं सदा मत्वा विमुच्यते ॥ २०० ॥

परिभूतेर्मृतेर्नैव यो बिभेति कदाचन ।
देहादिभ्रमसन्त्यागात्स वै मुक्तो भविष्यति ॥ २०१ ॥

लकाौकं विषयज्ञानं यत्तद्ब्रह्म चिदात्मकम् ।
तन्निष्ठविषयं त्यक्त्वा ज्ञानं ब्रह्मेति निश्चिनु ॥ २०२ ॥

शास्त्रान्तरैर्यथातत्त्वं निर्णीतं तत्ततोऽन्यथा ।
वेदान्ताभिमतं ज्ञेयं गुरुतोऽद्वयलक्षणम् ॥ २०३ ॥

अथात आदेश इति काण्वादिश्रुतिरब्रवीत् ।
सर्वं शून्यं नेति नेति वाक्यैरात्मा चिदद्वयः ॥ २०४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अद्वैतदृढविज्ञाने यथेष्टाचरणं कुतः ।
जीवन्मुक्त्यादिशास्त्रं तु ज्ञानस्तुत्यर्थवादकम् ॥ २०५ ॥

बालान्प्रति विवर्तोऽयं ब्रह्मणस्सकलञ्जगत् ।
अविवर्तितमानन्दमास्थिताः कृतिनस्सदा ॥ २०६ ॥

न किञ्चिदपि वस्त्वस्ति पृथक् प्रत्यक्चिदात्मनः ।
सुप्तिवत्सर्वशून्यत्वात्तत्साक्षी चित्सदाऽद्वयः ॥ २०७ ॥

सर्वदा सर्वशून्यत्वनिश्चयात्स्यान्मनोलयः ।
समाधिरपि नान्योऽतो निर्विकल्पाख्य उत्तमः ॥ २०८ ॥

सर्वं शून्यं सदा शून्यं पूर्णं चिन्मात्रमद्वयम् ।
नानामतविकल्पानामास्पदं निर्मलं शिवम् ॥
नानामतमहामद्यमाद्यन्मत्ताद्यगोचरम् ॥ २०९ ॥

मनोवागादिगम्यत्वे ब्रह्मणो ब्रह्मता कथम् ।
अतस्तूष्णीमवस्थानं तत्प्राप्तौ साधनं श्रुतम् ॥ २१० ॥

दृश्यं शून्यं दृगात्मैव केवलस्सुखमाततः ।
सुप्तिकाले यथा जाग्रत्येवं कालत्रयेऽपि च ॥ २११ ॥

मनोरथं द्विधा मत्वा जाग्रत्स्वप्न इति भ्रमात् ।
भोग्यबुद्ध्या संसरति जाग्रद्वस्तुन्यनात्मधीः ॥ २१२ ॥

अनात्मशून्यताज्ञानदार्ढ्यादेहात्मधीक्षये ।
तूष्णीम्भावो भवेन्मुक्तेस्साधनं परमं श्रुतेः ॥ २१३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आरम्भः परिणामो वा विवर्तश्रुतिसम्मतः ।
असत्वादात्मनोऽन्यस्य नैव कारणकार्यता ॥ २१४ ॥

अद्वैतब्रह्मरूपत्वात्कुतः कारणकार्यता ।
काणादसाङ्ख्यबौद्धादिमतमेतन्न तु श्रुतेः २१५ ॥

सर्वाऽऽसङ्गविनिर्मुक्तो मोक्षमात्रप्रयोजनः ।
अतोऽधिक्रियते प्रत्यज्ञानोत्पत्तौ न रागवान् ॥ २१६ ॥

मृगतृष्णायामुदकं शुक्तौ रजतं भुजङ्गमो रज्ज्वाम् ।
मयि लसति चन्द्रयुगवद्भ्रान्तं निखिलञ्जगद्रूपम् ॥ २१७ ॥

शास्त्रान्तरैस्तु यत्प्रोक्तं तत्त्वमित्यन्यथा मृषा ।
अद्वैतमेव चिन्मात्रं सत्यं वेदान्तसम्मतम् ॥ २१८ ॥

अत एव श्रुतिर्मूर्खशास्त्रप्रोक्तं निषेधति ।
नेति नेतीति चातोऽन्यदार्तमित्यादि वाक्यतः ॥ २१९ ॥

ज्ञानमात्रं परं ब्रह्म ज्ञेयं बुद्ध्यादिकं जडम् ।
ज्ञानं प्रत्यक्परं ब्रह्म ज्ञेयं तुच्छं पराग्जडम् ॥ २२० ॥

दुःखाद्यनुभवो ब्रह्म दुःखादि ज्ञेयवर्जितम् ।
केवलानुभवो ह्यात्मा ब्रह्मभिन्नं न किञ्चन ॥ २२१ ॥

मनश्शून्यं सदा कुर्यात्सुप्तिमूर्छादिवद्बुधः ।
यदा निर्विषयं चित्तं तदा शून्यं विमुच्यते ॥ २२२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदार्थभासनं ज्ञानं स्वयञ्ज्योतिरितीर्यते ।
नाम्नयादिवत्तमोनाशकरं ध्वान्तानुभूतितः ॥ २२३ ॥

श्रुतिस्मृतीतिहासादि जगज्जीवेश्वरादिकम् ।
स्वप्नादिवन्मनोमात्रमप्याश्चर्यकरं मृषा ॥ २२४ ॥

यथोक्तसाधनोपेतं ब्रह्मज्ञानं विमुक्तिदम् ।
अन्यथा विपरीतं स्याद्रसताम्रादिभस्मवत् ॥ २२५ ॥

सारासारविवेकी सन् लोकतत्त्वविचक्षणः ।
आत्मानात्मस्वरूपज्ञो भव तूष्णीं मृतादिवत् ॥ २२६ ॥

हस्तस्थकौस्तुभं त्यक्त्वा काचकाङ्क्षीव दुर्भगः ।
बुद्धिसाक्षिणमात्मानं हित्वान्यं तु य इच्छति ॥ २२७ ॥

सर्वसाक्षिस्वरूपं यच्चिन्मात्रञ्चेत्यवर्जितम् ।
अहमेव न मत्तोऽन्यदिति मुक्तो दृढाग्रहात् ॥ २२८ ॥

साधनान्तरसङ्घातं संत्यज्याशु सुदूरतः ।
शून्यं ध्यायेत्सदा दृश्यं तूष्णीम्भावो हि साधनम् ॥ २२९ ॥

किन्तश्चिन्त्यमचिन्त्यं किमिति सम्यग्विचारिते ।
चिन्ताविषयशून्यत्वात्तूष्णीम्भावोऽवशिष्यते ॥ २३० ॥

यथाजाग्रत्तथा स्वप्नो यथा स्वप्नस्तथा जनिः ।
इति निर्णयतस्तूष्णीं न किञ्चिदपि चिन्तयेत् ॥ २३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावद्यावद्दृश्यमात्रे तुच्छत्वदृढनिश्चयः ।
तावत्तावन्मनोनाशात्स्वात्मानन्दो विभासते ॥ २३२ ॥

श्रुतिस्मृत्युक्तकर्मैव दृढवैराग्यकारणम् ।
स्वात्मज्ञाने मुख्यहेतुर्दृढवैराग्यमेव हि ॥ २३३ ॥

अत्र सर्वभावितशेषशङ्कापङ्कसुशोधनम् ।
स्वप्राप्यभेद्यदृष्टान्तगङ्गोदौघैर्विधीयताम् ॥ २३४ ॥

भ्रान्तधीकल्पिते दृश्ये शोकमोहादिकं कुतः ।
विदुषामपि दुस्त्याज्यं विना तु दुरितक्षयम् ॥ २३५ ॥

यदस्ति यद्भाति तदात्मरूपं
नान्यत्ततो भाति न चान्यदस्ति ।
स्वभावसंवित्प्रतिभाति केवलं
ग्राह्यं ग्रहीतेति मृषैव कल्पना ॥ २३६ ॥

अन्तरेण श्रुतिं त्वन्यमानेनाद्वैतधीर्यदि ।
चक्षुषापि रसज्ञानं भवेत्तस्य दुरात्मनः ॥ २३७ ॥

यदि वेदः प्रमाणं स्याच्छ्रौतमद्वैतमेव हि ।
नासतो विद्यते भावोऽपीत्याह भगवान्स्फुटम् ॥ २३८ ॥

कलौ वेदान्तिनः पापाः कान्ताकाञ्चनतत्पराः ।
सांपरायं श्रौतकर्म न कुर्वन्त्यन्यथैव तु ॥ २३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलमिह परोपदेशैर्मौनं मुक्तेस्तु साधनं मुख्यम् ।
नैवापद्यपि हेया निष्ठाऽद्वैते सुखानुभूत्याद्या ॥ २४० ॥

विषयापेक्षं दुःखं दृष्टं लोके सुखं तु वैषयिकम् ।
अद्वैतमेव सुसुखं तदपि च दृष्टं सुषुप्तिकाले हि ॥ २४१ ॥

विना साधनमर्थानां सिद्धिर्न क्वापि दृश्यते ।
ब्रह्मज्ञानं कथं सिद्ध्येद्विना श्रुत्युक्तसाधनम् ॥ २४२ ॥

अज्ञौ पतङ्गवद्बुद्धावपि दुःखात्मके भवे ।
सुखभ्रान्त्या पतन्त्येव श्रौतसंस्कारवर्जिताः ॥ २४३ ॥

अष्टाधिकचत्वारिंशत्संस्कारजविवेकतः ।
वैराग्यादेर्ज्ञानसिद्धिर्नान्यसाधनकोटिभिः ॥ २४४ ॥

दृश्यं नास्तीति सततं सत्यं ब्रूते श्रुतिस्स्वयम् ।
भक्त्या बुद्ध्वा मातृवाक्यं न किञ्चिदपि चिन्तयेत् ॥ २४५ ॥

व्रात्यश्श्रोत्रिय इत्यादिभेदधीर्बन्धकारणम् ।
सुप्तिमूर्च्छादिवद्भेदशून्यधीर्मोक्षकारणम् ॥ २४६ ॥

प्रत्यगात्मा परञ्ज्योतिर्माया सा तु महत्तमः ।
तथा सति कथं मायासंभवः प्रत्यगात्मनि ॥ २४७ ॥

तस्मात्तर्कप्रमाणाभ्यां स्वानुभूत्या च चिद्घने ।
स्वप्रकाशैकसंसिद्धे नास्ति माया परात्मनि ॥ २४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यावहारिकदृष्ट्येयं विद्याऽविद्या च नान्यथा ।
तत्त्वदृष्ट्या तु नास्त्येव तत्त्वमेवास्ति केवलम् ॥ २४९ ॥

व्यावहारिकदृष्टिस्तु प्रकाशाव्यभिचारतः ।
प्रकाश एव सततं तस्माद्द्वैतमेव हि ॥ २५० ॥

अद्वैतमिति चोक्तिश्च प्रकाशाव्यभिचारतः ।
प्रकाश एव सततं तस्मान्मौनं हि युज्यते ॥ २५१ ॥

महामायामोहशक्तिरामुष्मिककृतार्थता ।
ऐहिकैत्वकृतार्थत्वं विदुषामपि दृश्यते ॥ २५२ ॥

येन केनाप्युपायेन यत्र क्व च न किञ्चन ।
श्रुत्युक्तमौनान्नैवान्यन्मुक्तेस्साधनमिष्यते ॥ २५३ ॥

सहस्रधा गौडपादो वासिष्ठमनुचिन्तयन् ।
माण्डूक्यकारिकां चक्रे शुद्धाद्वैतविभासिनीम् ॥ २५४ ॥

माण्डूक्यवार्तिकैवैषा वासिष्ठाख्या महामतिः ।
सर्वोपनिषदां सूत्रं माण्डूक्योपनिषच्छिवा ॥ २५५ ॥

श्रीरामसदृशश्शिष्यः वसिष्ठसदृशो गुरुः ।
वासिष्ठसदृशं शास्त्रं न भूतो न भविष्यति ॥ २५६ ॥

अस्ति वन्ध्यासुतसमं दृश्यं माया मनोमयम् ।
नास्ति सत्यस्वप्रकाशस्वानन्दानुभवात्मदृक् ॥ २५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वप्नसुप्त्यादिदृष्टान्तैर्बन्धमोक्षविवेकतः ।
महाभाग्यैस्तत्त्वबोधेनेत्थं मुह्यति पण्डितः ॥ २५८ ॥

साक्षात्कारस्सुखादीनां भोगस्संसार एव सः ।
स्वस्वरूपं नित्यमुक्तं ज्ञानं निर्विषयं सुखम् ॥ २५९ ॥

चिन्मात्रमेव चिन्मात्रान्नान्यत्किञ्चन वस्तु सत् ।
अभ्यसेदुन्मनीभावं मुमुक्षुस्त्वरयाऽनिशम् ॥ २६० ॥

अस्तित्ववेदने दुःखं सुखं नास्तित्वनिश्चये ।
दृश्यस्य फलवैषम्यान्नास्तित्वं दृढमभ्यसेत् ॥ २६१ ॥

माया नास्ति न तत्कार्यं जगज्जीवेश्वरादिकम् ।
सन्मात्रं केवलं ज्ञानमद्वयं शून्यवत्सदा ॥ २६२ ॥

अज्ञातसत्तयास्वर्गनरकादि न किञ्चन ।
कर्मोपासनकाण्डादेश्शुद्धाद्वैते समन्वयात् ॥
नित्यकर्मोपासनादिसाधनं त्वात्मवेदने ॥ २६३ ॥

जन्मादिरहितं ज्ञानं परं तेज[ज्योति]स्सदद्वयम् ।
जन्मादिरहितं ज्ञेयं सदा शून्यं परं तमः ॥ २६४ ॥

लयविक्षेपरहितं शैलवन्निश्चलं मनः ।
यदा भवेत्तदा मुक्तो जागरेऽपि सुषुप्तवत् ॥ २६५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नित्यापरोक्षचिन्मात्रस्वस्वरूपसुखाद्वये ।
आवारकतमोऽसत्यमायाद्वैतस्य का कथा ॥ २६५ ॥

सर्वं ब्रह्मैव चिन्मात्रं चितश्चेत्यं न विद्यते [भिद्यते] ।
स्वप्नवत्सर्वसाम्येपि जागरे सत्यधीः कथम् ॥ २६६ ॥

स्वप्नभ्रमपदार्थेषु तत्काले सत्यधीर्यथा ।
तद्वज्जाग्रत्पदार्थेपि तत्काले सत्यधीर्भ्रमात् ॥ २६७ ॥

इदमेव चिदाकाशं पुरो भाति न भौतिकम् ।
प्रत्यगात्मा परं ब्रह्म चिदाकाशमखण्डितम् ॥ २६८ ॥

वन्ध्यापुत्रकृतं यद्वच्चिदाकाशं न संस्पृशेत् ।
मिथ्यादेहादिजं तद्वत्पुण्यपापं न संस्पृशेत् ॥ २६९ ॥

असाध्यं चिन्त्यते मूर्खैस्साध्यं नैव तु साधितुम् ।
महापापवशाद्बुद्धेरिच्छाद्वेषसमुद्भवात् ॥ २७० ॥

कारणोपादानमृते कार्यं नैवोपलभ्यते ।
कथं बुद्धोऽपि तद्विद्याज्जगत्तत्कारणं विना ॥ २७१ ॥

द्वैताभावदृढज्ञाने विषयाभावतो मनः ।
न किञ्चिच्चिन्तयेत्तूष्णीं मृतसुप्तादिवद्भवेत् ॥ २७२ ॥

ब्रह्मादिस्तम्बपर्यन्तं चराचरमिदं जगत् ।
चितिस्वप्नादिवद्भाति प्रबोधे नास्त्यसद्भवेत् ॥ २७३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैवेन्द्रजालिकोऽपीच्छेत्स्वसृष्टं महदद्भुतम् ।
तथा नेच्छति चेन्मुक्तस्त्वसृष्टं स्वप्नवज्जगत् ॥ २७४ ॥

व्यवहारे मुख्यहेतुर्ज्ञानं सर्वपदार्थगम् ।
तदेवात्मा जगन्मूलं सत्यं ज्ञानमिति श्रुतेः ॥ २७५ ॥

गुडनिम्बरसो यद्वदन्यथा गृह्यते विषात् ।
विषयाशाविषादात्माप्येवं कामवशानुगैः ॥ २७६ ॥

चोद्यं वा परिहारो वा क्रियतां द्वैतभाषया ।
अद्वैतभाषया चोद्यं नास्ति नापि तदुत्तरम् ॥ २७७ ॥

नीरोग उपविष्टो वा रुग्णो वापि लुठन्भुवि ।
मूर्च्छितो वा त्यजत्वेष प्राणान्भ्रान्तिर्न सर्वथा ॥ २७८

दिने दिने स्वप्नसुप्त्योरधीते विस्मृतेऽप्ययम् ।
परेद्युर्नानधीतस्स्यात्तद (दा) विद्या विनश्यति ॥ २७९ ॥

प्रमाणोत्पादिता विद्या प्रमाणं प्रबलं विना ।
न नश्यति न वेदान्तात्प्रबलं मानमीक्ष्यते ॥ २८० ॥

बोधेऽप्यनुभवो यस्य न कथञ्चन जायते ।
तं कथं बोधयेच्छास्त्रं लोष्टं नरसमाकृतिम् ॥ २८१ ॥

जिह्वा मेऽस्ति न वेत्युक्तिः लज्जायै केवलं यथा ।
न बुद्धयते मया बोधो बोद्धव्य इति तादृशी ॥ २८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स वेत्ति वेद्यं तत्सर्वं नान्यस्तस्यास्ति वेदिता ।
विदिताविदिता यां तत्पृथक् बोधस्वरूपकम् ॥ २८३ ॥

पञ्चकोशपरित्यागे साक्षिबोधावशेषतः ।
स्वस्वरूपं स एव स्याच्छून्यत्वं तस्य दुर्घटम् ॥ २८४ ॥

येनेदं जानते सर्वं तं केनान्येन जानताम् ।
विज्ञातारं केन विद्यात् शक्तं वेद्ये तु साधनम् ॥ २८५ ॥

अवेद्योऽप्यपरोक्षोऽतः स्वप्रकाशो भवत्ययम् ।
सत्यं ज्ञानमनन्तं चेत्यस्तीह ब्रह्मलक्षणम् ॥ २८६ ॥

न व्यापित्वादेशतोऽन्तो नित्यत्वान्नापि कालतः ।
न वस्तुतोऽपि सार्वात्म्यादानन्त्यं ब्रह्मणि त्रिधा ॥ २८७ ॥

विचारितमलं शास्त्रं चिरमुद्गाहितं मिथः ।
संत्यक्तवासनान्मौनादृते नास्त्युत्तमं पदम् ॥ २८८ ॥

सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः ।
जीवभावजगद्भावबाधे स्वात्मैव शिष्यते ॥ २८९ ॥

नाप्रतीतिस्तमोबाधः किंतु मिथ्यात्वनिश्चयः ।
नो चेत्सुषुप्तिमूर्च्छादौ मुच्येतायत्नतो जनः ॥ २९० ॥

परमात्मावशेषोऽपि तत्सत्यत्वविनिश्चयः ।
न जगद्विस्मृतिर्नोचेज्जीवन्मुक्तिर्न सम्भवेत् ॥ २९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न सदासीद्विभातत्वान्नोसदासीच्च बाधनात् ।
विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः ॥ २९२ ॥

तुच्छानिर्वचनीया च वास्तवी चेत्यसौ त्रिधा ।
ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः ॥ २९३ ॥

सौषुप्तमानन्दमयं प्रक्रम्यैवं श्रुतिर्जगौ ।
एष सर्वेश्वर इति सोऽयं वेदोक्त ईश्वरः ॥ २९४ ॥

तस्मान्मुमुक्षिभिर्नैव मतिर्जीवेशवादयोः ।
कार्या किंतु ब्रह्मतत्त्वं विचार्यं बुध्यतां च तत् ॥ २९५ ॥

एवं तर्हि शृणु द्वैतमसन्मायामयत्वतः ।
तेन वास्तवमद्वैतं परिशेषाद्विभासते ॥ २९६ ॥

पुनश्चैतस्य वस्तुत्वं भाति चेत्तं तथा पुनः ।
परिशीलय कोवात्र प्रयासस्तेन ते वद ॥ २९७ ॥

कियन्तं कालमिति चेत् खेदोऽयं द्वैत इष्यताम् ।
अद्वैते तु न युक्तोऽयं सर्वानर्थनिवारणात् ॥ २९८ ॥

परोक्षा चापरोक्षेति विद्या द्वेधा विचारणा ।
तत्रापरोक्षविद्यांतौ विचारोऽयं समाप्यते ॥ २९९ ॥

झटित्यध्यास आयाति दृढवासनयेति चेत् ।
आवर्तयेद्विवेकञ्च दृढं वासयितुं सदा ॥ ३०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संगी हि बध्यते लोके निस्सङ्गस्सुखमश्नुते ।
तेन सङ्गः परित्याज्यः सर्वदा सुखमिच्छता ॥ ३०१ ॥

अज्ञात्वा शास्त्रहृदयं मूढो वक्त्यन्यथान्यथा ।
मूर्खाणां निर्जयस्त्वास्तामस्मिन्सिद्धान्त उच्यते ॥ ३०२ ॥

वैराग्यबोधोपरमास्सहायास्ते परस्परम् ।
प्रायेण सह वर्तन्ते वियुज्यन्ते क्वचित् क्वचित् ॥ ३०३ ॥

हेतुस्वरूपकार्याणि भिन्नान्येषामसङ्करः ।
यथावदवगन्तव्यः शास्त्रार्थं प्रविविच्यता ॥ ३०४ ॥

दोषदृष्टिर्जिहासा च पुनर्भोगेष्वधीनता ।
असाधारणहेत्वाद्या वैराग्यस्य त्रयोऽप्यमी ॥ ३०५ ॥

श्रवणादित्रयं तद्वत्तत्त्वमिथ्याविवेचनम् ।
पुनर्ग्रन्थेरनुदयः बोधस्यैते त्रयो मताः ॥ ३०६ ॥

यमादिधीर्निरोधश्च व्यवहारस्य संक्षयः ।
स्युर्हेत्वाद्या उपरतेरित्यसङ्कर ईरितः ॥ ३०७ ॥

तत्त्वबोधः प्रधानं स्यात् साक्षान्मोक्षप्रदत्वतः ।
बोधोपकारिणावेतौ वैराग्योपरमावुभौ ॥ ३०८ ॥

एते त्रयोऽपि पक्वाश्चेन्महतस्तपसः फलम् ।
दुरितेन क्वचित्किञ्चित्कदाचित्प्रतिबध्यते ॥ ३०९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैराग्योपरती पूर्णे बोधस्तु प्रतिबध्यते ।
यस्य तस्य न मोक्षोऽस्ति पुण्यलोकस्तपोबलात् ॥ ३१० ॥

पूर्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा ।
मोक्षोऽपि निश्चितः किंतु दृष्टदुःखं न नश्यति ॥ ३११ ॥

ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः ।
देहात्मत्वपरात्मत्वदाढर्ये बोधस्समाप्यते ॥ ३१२ ॥

सुप्तिवद्विस्मृतिस्सीमा भवेदुपरमस्य हि ।
दिशानया विनिश्चेयं तारतम्यमवान्तरम् ॥ ३१३ ॥

अवज्ञातं सदद्वैतं निःशङ्कैरन्यवादिभिः ।
एवं का क्षतिरस्माकमद्वैतमभिजानताम् ॥ ३१४ ॥

द्वैतावज्ञा सुस्थिता चेदद्वैते धीस्थिरा भवेत् ।
स्थैर्ये तस्याः पुमानेषः जीवन्मुक्त इतीर्यते ॥ ३१५ ॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥ ३१६ ॥

जीवद्वैतं तु शास्त्रीयमशास्त्रीयमिति द्विधा ।
उपाददीत शास्त्रीयमातत्त्वस्यावबोधनात् ॥ ३१७ ॥

आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत् ।
बुद्धे तत्त्वे तच्च हेयमिति श्रुत्यनुशासनम् ॥ ३१८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्राण्यधीत्य मेधावी ह्यभ्यस्य च पुनः पुनः ।
परमं ब्रह्म विज्ञाय तान्यथोल्कावदुत्सृजेत् ॥ ३१९ ॥

ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः ।
पलालमिव धान्यार्थी त्यजेत्ग्रन्थमशेषतः ॥ ३२० ॥

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।
नानुध्यायाद्बहून्शब्दान्वाचो विग्लापनं हि तत् ॥ ३२१ ॥

तमेवैकं विजानीथ ह्यन्या वाचो विमुञ्चथ ।
यच्छेद्वाङ्मनसी प्राज्ञ इत्याद्याश्श्रुतयस्स्फुटाः ॥ ३२२ ॥

अशास्त्रीयमपि द्वैतं तीव्रं मन्दमिति द्विधा ।
कामक्रोधादिकं तीव्रं मनोराज्यं तथेतरत् ॥ ३२३ ॥

उभयं तत्त्वबोधात्प्राक् निवार्यं बोधसिद्धये ।
शमस्समाहितत्वं च साधनेषु श्रुतं ततः ॥ ३२४ ॥

बोधादूर्ध्वं च तद्ध्येयं जीवन्मुक्तिप्रसिद्धये ।
कामादिक्लेशबन्धेन युक्तस्य न हि मुक्तता ॥ ३२५ ॥

तत्त्वं बुद्ध्वापि कामादीन्निश्शेषं न जहासि चेत् ।
यथेष्टाचरणं ते स्याद्धर्मशास्त्रातिलंघिनः ॥ ३२६ ॥

बुद्ध्वाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि ।
शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे ॥ ३२७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बोधात्पुरा मनोमात्रदोषात्क्लेश्यस्यथाधुना ।
अशेषलोकनिन्दा चेदहो ते बोधवैभवम् ॥ ३२८ ॥

विड्वराहादितुल्यत्वं मा काङ्क्षीत्तत्त्वविद्भवान् ।
सर्वधीदोषसन्त्यागाल्लोके पूज्यश्च देववत् ॥ ३२९ ॥

कामादिदोषदृष्ट्याद्याः कामादित्यागहेतवः ।
प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव ॥ ३३० ॥

त्यज्यतामेष कामादिर्मनोराज्ये तु का क्षतिः ।
अशेषदोषबीजत्वात्क्षतिर्भगवतेरिता ॥ ३३१ ॥

ध्यायतो विषयान्पुंसस्सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥ ३३२ ॥

शक्यं जेतुं मनोराज्यं निर्विकल्पसमाधितः ।
सुसंपादः क्रमात्सोऽपि सविकल्पसमाधिना ॥ ३३३ ॥

बुद्धतत्त्वेन धीदोषशून्येनैकान्तवासिना ।
दीर्घं प्रणवमुच्चार्य मनोराज्यं विजीयते ॥ ३३४ ॥

जिते तस्मिन्वृत्तिशून्यं मनस्तिष्ठति मूकवत् ।
एतत्पदं वसिष्ठेन रामाय बहुधेरितम् ॥ ३३५ ॥

दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम् ।
सम्पन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः ॥ ३३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विक्षिप्यते कदाचिद्धीः कर्मणा भोगदायिना ।
पुनस्समाधिना साध्यात्तदेवाभ्यासपाटवात् ॥ ३३७ ॥

विक्षेपो यस्य नास्त्यद्य ब्रह्मवित्त्वं न मन्यते ।
ब्रह्मैवायमिति प्राहुः मुनयः पारदर्शिनः ॥ ३३८ ॥

दर्शनाऽदर्शने हित्वा स्वयङ्केवलरूपतः ।
यस्तिष्ठति स तु ब्रह्मन् ब्रह्म न ब्रह्मवित्स्वयम् ॥ ३३९ ॥

य एवं ब्रह्म वेदैष ब्रह्मैव भवति स्वयम् ।
ब्रह्मणो नास्ति जन्मातः पुनरेष न जायते ॥ ३४० ॥

प्रत्यग्बोधो यत्र भाति सोऽद्वयानन्दलक्षणः ।
अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः ॥ ३४१ ॥

इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् ।
अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥ ३४२ ॥

तदर्थस्य च पारोक्ष्यं यद्येवं किं ततश्शृणु ।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥ ३४३ ॥

अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् ।
शमादिसहितस्तावदभ्यसेच्छ्रवणादिकम् ॥ ३४४ ॥

वेदान्तानामशेषाणामादिमध्यावसानतः ।
ब्रह्मात्मन्येव तात्पर्यमिति धीश्श्रवणं भवेत् ॥ ३४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।
एतदेकपरत्वञ्च ब्रह्माभ्यासं विदुर्बुधाः ॥ ३४६ ॥

समन्वयाध्याय एतत्सूकं धीस्स्वास्थ्यकारिभिः ।
तर्कैस्सम्भावनार्थस्य द्वितीयाध्याय ईरिता ॥ ३४७ ॥

बहुजन्मदृढाभ्यासादेहादिष्वात्मधीः क्षणात् ।
पुनः पुनरुदेत्येवं जगत्सत्यत्वधीरपि ॥ ३४८ ॥

विपरीता भावनेयमेका स्यात्सा निवर्तते ।
तत्त्वोपदेशात्प्रागेव भवत्येतदुपासनात् ॥ ३४९ ॥

उपास्तयोऽत एवात्र ब्रह्मशास्त्रेऽपि चिन्तिताः ।
प्रागनभ्यासिनः पश्चाद्ब्रह्माभ्यासेन तद्भवेत् ॥ ३५० ॥

इति श्रुतिस्मृतो नित्यमात्मन्येकाग्रतां धियः ।
विधत्तो विपरीताया भावनायाः क्षयाय हि ॥ ३५१ ॥

यद्यथा वर्तते तस्य तत्त्वं हित्वान्यथैव धीः ।
विपरीता भावना स्यात्पित्तादावरिधीर्यथा ॥ ३५२ ॥

आत्मदेहादिभिन्नोऽयं मिथ्या चेदं जगत्त्रयोः ।
देहाद्यात्मत्वसत्यत्वधीर्विपर्ययभावना ॥ ३५३ ॥

तत्त्वभावनया नश्येत्साऽतो देहातिरिक्तताम् ।
आत्मनो भावयेत्तद्वन्मिथ्यात्वं जगतोऽनिशम् ॥ ३५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किं मन्त्रजपवन्मूर्तिध्यानवच्चात्मभेदधीः ।
जगन्मिथ्यात्वधीश्चात्र व्यावर्त्या स्यादुतान्यथा ॥ ३५५ ॥

अन्यथेति विजानीहि दृष्टार्थत्वेन भुक्तिवत् ।
भुभुक्षुजपवद्भुक्ते न कश्चिन्नियतः क्वचित् ॥ ३५६ ॥

अश्नाति वा न वाश्नाति भुङ्क्ते वा स्वेच्छयान्यथा ।
येन केन प्रकारेण क्षुधामपनिनीषति ॥ ३५७ ॥

नियमेन जपं कुर्यादकृतौ प्रत्यवायतः ।
अन्यथाकरणेऽनर्थस्स्वरवर्णविपर्ययात् ॥ ३५८ ॥

क्षुधेव दृष्टबाधात्र विपरीता च भावना ।
ज्ञेया केनाप्युपायेन नास्त्यत्रानुष्ठितेः क्रमः ॥ ३५९ ॥

उपायः पूर्वमेवोक्तस्तच्चिन्ताकथनादिकः ।
एतदेकपरत्वेऽपि निर्बन्धो ध्यानवन्न हि ॥ ३६० ॥

मिथ्यात्ववासनादार्ढ्ये प्रारब्धक्षयकाङ्क्षया ।
अक्लिश्यन्तः प्रवर्तन्ते स्वस्वकर्मानुसारतः ॥ ३६१ ॥

ज्ञानिनोऽज्ञानिनश्चात्र समे प्रारब्धकर्मणी ।
न क्लेशो ज्ञानिनो धैर्यान्मूढः क्लिश्यत्यधैर्यतः ॥ ३६२ ॥

मार्गे गन्त्रोर्द्वयोश्श्रान्तौ समायामप्यदूरताम् ।
ज्ञानं धैर्याद्वदुं गच्छेदन्यस्तिष्ठति दीनधीः ॥ ३६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साक्षात्कृतात्मधीस्सम्यगविपर्ययबाधितः ।
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥ ३६४ ॥

जगन्मिथ्यात्वधीभावादाक्षिप्तौ काम्यकामुकौ ।
तयोरभावे सन्तापश्शाम्येन्निस्स्नेहदीपवत् ॥ ३६५ ॥

गन्धर्वपत्तने किञ्चिन्नैन्द्रजालिकनिर्मिते ।
जानन्कामयते किन्तु जिहासति हसन्निव ॥ ३६६ ॥

आपातरमणीयेषु भोगेष्वेवं विचारवान् ।
नानुरज्यति किन्त्वेतान्दोषदृष्ट्या जिहासति ॥ ३६७ ॥

अर्थानामार्जने क्लेशस्तथैव परिपालने ।
नाशे दुःखं व्यये दुःखं धिगर्थान्क्लेशकारिणः ॥ ३६८ ॥

मांसपाञ्चालिकायास्तु यन्त्रलोलेऽङ्गपञ्जरे ।
स्नाय्वस्थिग्रन्थिशालिन्यास्स्त्रियाः किमिव शोभनम् ॥ ३६९ ॥

एवमादिषु शास्त्रेषु दोषास्सम्यक् प्रपञ्चिताः ।
विमृशन्ननिशं तानि कथं दृष्टेषु मज्जति ॥ ३७० ॥

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ ३७१ ॥

नायं क्लेशोऽत्र संसारतापः किन्तु विरक्तता ।
भ्रान्त्यज्ञाननिदानो हि तापस्सांसारिकस्स्मृतः ॥ ३७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विवेकेन परिविलङ्घनन्नल्पभोगेन तृप्यति ।
अन्यथाऽनन्तभोगेऽपि नैव तृप्यति कर्हिचित् ॥ ३७३ ॥

अवश्यम्भाविभावानां प्रतीकारो भवेद्यदि ।
तदा दुःखैर्न लिप्येरन्नलरामयुधिष्ठिराः ॥ ३७४ ॥

जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चो यत्प्रकाशते ।
तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥ ३७५ ॥

अस्मिन्निद्रापि जीवेशौ चेतनौ स्वप्नगौ सृजेत् ।
महामाया सृजत्येतावित्याश्चर्यं किमत्र ते ॥ ३७६ ।

सर्वज्ञत्वादिकञ्चेशे कल्पयित्वा प्रदर्शयेत् ।
धर्मिणं कल्पयेद्यास्याः को भारो धर्मकल्पने ॥ ३७७ ॥

यथा यथा भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रियेत्यस्यास्साध्वीत्याचार्यभाषितम् ॥ ३७८ ॥

श्रुतितात्पर्यमखिलमबुद्ध्वा भ्राम्यते जडः ।
विवेकी त्वखिलं बुद्ध्वा तिष्ठत्यानन्दवारिधौ ॥ ३७९ ॥

विचारयन्नामरणं नैवात्मानं लभेत चेत् ।
जन्मान्तरे लभेतैव प्रतिबन्धक्षये सति ॥ ३८० ॥

वर्णाश्रमवयोवस्थाऽभिमानो यस्य विद्यते ।
तस्यैव हि निषेधाश्च विधयस्सकला अपि ॥ ३८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्णाश्रमादयो देहे मायया परिकल्पिताः ।
नात्मनो बोधरूपस्येत्येवं तस्य विनिश्चयः ॥ ३८२ ॥

समाधिमथ कर्माणि मा करोतु करोतु वा ।
हृदये न्यस्तसर्वार्थो मुक्त एव न संशयः ॥ ३८३ ॥

नैष्कर्म्येण न तस्यार्थस्तस्यार्थोऽस्ति न कर्मभिः ।
न समाधानजप्याभ्यां यस्य निर्वासनं मनः ॥ ३८४ ॥

अनुभूतेरभावेऽपि ब्रह्माऽस्मीत्येव चिन्त्यताम् ।
अभ्यसत्प्राप्यते ध्यानाद्भित्वासं ब्रह्म किं पुनः ॥ ३८५ ॥

अनात्मबुद्धिशैथिल्यं फलं ध्यानादिने दिने ।
पश्यन्नपि न चेद्धत्तायेत्कोऽपरोऽस्मात्पशुर्वद ॥ ३८६ ॥

देहाभिमानं विध्वस्य ध्यानादात्मानमद्वयम् ।
पश्यन्मर्त्यो मृतो भूत्वा ह्यत्र ब्रह्म समश्नुते ॥ ३८७ ॥

अनेकजन्मभजनात्स्वविचारं चिकीर्षति ।
विचारेण विनष्टायां मायायां शिष्यते स्वयम् ॥ ३८८ ॥

अद्वयानन्दरूपस्य सद्वयत्वञ्च दुःखिता ।
बन्धः प्रोक्तस्स्वरूपेण स्थितिर्मुक्तिरितीर्यते ॥ ३८९ ॥

अविचारकृतो बन्धो विचारेण निवर्तते ।
तस्माज्जीवपरात्मानौ सर्वदैव विचारयेत् ॥ ३९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईक्षे शृणोमि जिघ्रामि स्वादयामि स्पृशाम्यहम् ।
इति भासयते सर्वं नृत्यशालास्थदीपवत् ॥ ३९१ ॥

निरन्तरं भासमाने कूटस्थे ज्ञप्तिरूपतः ।
तद्भासा भास्यमानेयं बुद्धिर्नृत्यत्यनेकधा ॥ ३९२ ॥

न बाह्यो नान्तरस्साक्षी बुद्धेर्देशौ हि तावुभौ ।
बुद्ध्याद्यशेषसंशान्तौ यत्र भात्यस्ति तत्र सः ३९३ ॥

यद्यद्रूपादि कल्येत बुद्ध्या तत्तत्प्रकाशयन् ।
तस्य तस्य भवेत्साक्षी स्वतो वान्बुद्ध्यगोचरः ॥ ३९४ ॥

कथं तादृङ्न्या ग्राह्य इति चेन्मैव गृह्यताम् ।
सर्वग्रहोपसंशान्तौ स्वयमेवावशिष्यते ॥ ३९५ ॥

न तत्र मानापेक्षाऽस्ति स्वप्रकाशस्वरूपतः ।
तादृग्व्युत्पत्त्यपेक्षा चेच्छ्रुतिं षठ गुरोर्मुखात् ॥ ३९६ ॥

यदि सर्वपरित्यागोऽशक्यस्तर्हि धियं व्रज ।
शरणं तदधीनोऽन्तर्बहिर्वेषोऽनुभूयताम् ॥ ॥ ३९७ ॥

सनत्कुमारः प्राहैवं नारदायातिशोकिने ।
यो भूमा तत्सुखं नाल्पे सुखं नेह विभेदिनि ॥ ३९८

स पुराणान्पश्च वेदान् शास्त्राणि विविधानि च ।
ज्ञात्वाप्यनात्मविरक्तेन नारदोऽतिशुशोचह ॥ ३९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदाभ्यासात्पुरा तापत्रयमात्रेण शोकिता ।
पश्चात्त्वभ्यासविस्फारभङ्गगर्वैश्च शोकिता ॥ ४०० ॥

सोऽहं विद्वन्प्रशोचामि शोकपारं नयात्र माम् ।
इत्युक्तस्सुखमेवास्य पारमित्यभ्यधाद्दृषिः ॥ ४०१ ॥

सुखं वैषयिकं शोकसहस्रेणावृतत्वतः ।
दुःखमेवेति मत्वाह नाल्पेऽस्ति सुखमित्यसौ ॥ ४०२ ॥

ननु द्वैते सुखं माभूदद्वैतेऽप्यस्ति नो सुखम् ।
अस्ति चेदुपलभ्येत तथा च त्रिपुटी भवेत् ॥ ४०३ ॥

मास्तु द्वैते सुखं किन्तु सुखमद्वैतमेव हि ।
किं मानमिति चेन्नास्ति मानाकाङ्क्षा स्वयम्प्रभे ॥ ४०४ ॥

स्वप्रभुत्वे भवद्वाक्यं मानं यस्माद्भवानिदम् ।
अद्वैतमभ्युपेत्यास्मिन्सुखं नास्तीति भाषते ॥ ४०५ ॥

नाभ्युपैम्यहमद्वैतं त्वद्वचोऽनृद्य दूषणम् ।
वच्मीति चेत्तदा ब्रूहि किमासीद्वै ततः पुरा ॥ ४०६ ॥

किमद्वैतमुत द्वैतमन्यो वा कोटिरन्तिमः ।
अप्रसिद्धो न द्वितीयोऽनुत्पत्तेश्शिष्यतेऽग्रिमः ॥ ४०७ ॥

अद्वैतसिद्धिर्युक्त्यैव नानुभूत्येति चेद्वद ।
निर्दृष्टान्ता सदृष्टान्ता वा कोऽत्यन्तरमत्र न ॥ ४०८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नानुभूतिर्न दृष्टान्त इति युक्तिस्तु शोभते ।
सदृष्टान्तत्वपक्षे तु दृष्टान्तं वद मे मतम् ॥ ४०९ ॥

अद्वैतः प्रलयोद्वैतानुपलम्भेन सुप्तिवत् ।
इति चेत्सुप्तिरद्वैतेत्यत्र दृष्टान्तमीरय ॥ ४१० ॥

दृष्टान्तः परतृप्तिश्चेदहो ते कौशलं महत् ।
यस्त्वसुप्तिं न वेत्त्यस्य परसुप्तौ तु का कथा ॥ ४११ ॥

निश्चेष्टत्वात्परस्सुप्तौ यथाहमिति चेत्तदा ।
उदाहर्तुस्सुषुप्तेस्ते स्वप्रभत्वं बलाद्भवेत् ॥ ४१२ ॥

नेन्द्रियाणि न दृष्टान्तस्तथाप्यङ्गीकरोषि ताम् ।
इदमेव स्वप्रभत्वं यन्नानं साधनैर्विना ॥ ४१३ ॥

स्तामद्वैतस्वप्रभत्वे वद सुप्तौ सुखं कथम् ।
शृणु दुःखं तदा नास्ति ततस्ते शिष्यते सुखम् ॥ ४१४ ॥

अन्धस्सन्नप्यनन्धस्स्याद्विस्रोऽविस्रोऽथ रोग्यऽपि ।
अरोगीति श्रुतिः प्राह तच्च सर्वजना विदुः ॥ ४१५ ॥

स्वकीयसुखदुःखे तु नोहनीये ततस्तयोः ।
भावो वेद्योऽनुभूत्यैव तदभावोऽपि नान्यतः ॥ ४१६ ॥

तथा सति सुषुप्तौ च दुःखाभावोऽनुभूतितः ।
विरोधिदुःखराहित्यात्सुखं निर्विघ्नमिष्यताम् ॥ ४१७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महत्तरप्रयासेन मृदुशय्यादिसाधनम् ।
कुतस्सम्पाद्यते सुप्तौ सुखं चेत्तत्र नो भवेत् ॥ ४१८ ॥

दुःखनाशार्थमेवैतदिति चेद्रोगिणस्तथा ।
भवत्वरोगिणस्त्वेतत्सुखायैवेति निश्चिनु ॥ ४१९ ॥

तर्हि साधनजन्यत्वात्सुखं वैषयिकं भवेत् ।
भवत्वेवात्र निद्रायाः पूर्वशय्यासनादिजम् ॥ ४२० ॥

निद्रायां तु सुखं यत्तज्जन्यते केन हेतुना ।
सुखाभिमुखधीरादौ पश्चान्मज्जेत्परे सुखे ॥ ४२१ ॥

जाग्रद्व्यापृतिभिश्श्रान्तो विश्रम्याथ विरोधिनि ।
अपनीते स्वस्थचिन्तोऽनुभवे विषये सुखम् ॥ ४२२ ॥

आत्माभिमुखधीवृत्तौ स्वानंदः प्रतिबिम्बति ।
अनुभूयैनमद्यापि त्रिपुट्या शान्तिमाप्नुयात् ॥ ४२३ ॥

तच्छ्रमस्यापनुत्यर्थं जीवो धावेत्परात्मनि ।
तेनैक्यं प्राप्य तत्रत्यो ब्रह्मानन्दस्स्वयं भवेत् ॥ ४२४ ॥

बाह्यं रथ्यादिकं वृत्तं गृहकृत्यं यथान्तरम् ।
तथा जागरणं बाह्यं नाडीस्थस्स्वप्न आन्तरः ॥ ४२५ ॥

पिताऽपि सुप्तावपितेत्यादौ जीवत्ववारणात् ।
सुप्तौ ब्रह्मैव नो जीवः संसारित्वासमीक्षणात् ॥ ४२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितृत्वाद्यभिमानो यस्सुखदुःखाकरस्स हि ।
तस्मिन्नपगते तीर्णस्सर्वान्शोकान्भवत्ययम् ॥ ४२७ ॥

सुषुप्तिकाले सकले विलीने तमसा वृतः ।
सुखरूपमुपैतीति ब्रूते ह्याथर्वणी श्रुतिः ॥ ४२८ ॥

सुखमस्वाप्समत्राहं न वै किञ्चिदवेदिषम् ।
इति सुप्ते सुखाज्ञाने परामृशति चोत्थितः ॥ ४२९ ॥

परामर्शोऽनुभूतेस्तीत्यासीदनुभवस्तदा ।
चिदात्मत्वात्स्वतो भाति सुखमज्ञानधीस्ततः ॥ ४३० ॥

ब्रह्म विज्ञानमानन्दमिति वाजसनेयिनः ।
पठन्त्यतस्स्वप्रकाशस्सुखं ब्रह्मैव नेतरत् ॥ ४३१ ॥

यदज्ञानं तत्रलीनौ तौ विज्ञानमनोमयौ ।
तयोश्च विलयावस्था निद्राज्ञानं च सैव हि ॥ ४३२ ॥

सुप्तिपूर्वक्षणे बुद्धिवृत्तिर्या सुखबिम्बिता ।
सैव तद्बिम्बसहिता लीनानन्दमयस्ततः ॥ ४३३ ॥

अन्तर्मुखो य आनन्दमयो ब्रह्मसुखं तदा ।
भुङ्क्ते चिद्बिम्बयुक्ताभिरज्ञानोत्पन्नवृत्तिभिः ॥ ४३४ ॥

अज्ञानवृत्तयस्सूक्ष्मा विस्पष्टा बुद्धिवृत्तयः ।
इति वेदान्तसिद्धान्तपारगाः प्रवदन्ति हि ॥ ४३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माण्डूक्यतापनीयादिश्रुतिष्वेतदतिस्फुटम् ।
अज्ञानबिम्बिता चित्स्यान्मुखमानन्दभोजने ॥ ४३६ ॥

भुक्तं ब्रह्मसुखं त्यक्त्वा बहिर्यात्यथ कर्मगा ।
कर्म जन्मान्तरेऽभूद्यत्तद्योगाद्बुध्यते पुनः ॥ ४३७ ॥

इति कैवल्यशास्त्रायां कर्मजो बोध ईरितः ।
किञ्चित्कालं प्रबुद्धस्य ब्रह्मानन्दस्य वासना ॥ ४३८ ॥

अनुगच्छेद्यतस्तूष्णीमास्ते निर्विषयस्सुखी ।
कर्मभिः प्रेरितः पश्चान्नानादुःखानि भावयन् ॥ ४३९ ॥

शनैर्विस्मरति ब्रह्मानन्दमेषोऽखिलो जनः ।
प्रागूर्ध्वमपि निद्रायाः पक्षपातो दिने दिने ॥ ४४० ॥

ब्रह्मानन्दे नृणां तेन प्राज्ञोऽरिमन्दिवदेत कः ।
ननु तूष्णीं स्थितौ ब्रह्मानन्दश्चेज्ज्ञाति लौकिकाः ।
अलसाश्चरितार्थास्स्युश्शास्त्रेण गुरुणात्र किम् ॥ ४४१ ॥

वाढं ब्रह्मेति विद्युश्चेत्कृतार्थास्तावतैव ते ।
गुरुशास्त्रे विनात्यन्तं गम्भीरं ब्रह्म वेत्ति कः ॥ ४४२ ॥

जानाम्यहं त्वदुक्त्याद्य कुतो मे न कृतार्थता ।
श्रुण्वन्न त्वादृशो वृत्तं प्राज्ञम्मन्यस्य कस्यचित् ॥ ४४३ ॥

चतुर्वेदविदे देयमिति श्रुण्वन्नवोचत ।
वेदाश्चत्वार इत्येवं वेद्मि मे दीयतां धनम् ॥ ४४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संख्यामेवैष जानाति न तु वेदानशेषतः ।
यदि तर्हि त्वमप्येवं नाशेषं ब्रह्म वेत्सि हि ॥ ४४५ ॥

अखण्डैकरसानन्दे मायातत्कार्यवर्जिते ।
अशेषत्वसशेषत्ववार्तावसर एव कः ॥ ४४६ ॥

शब्दानेव पठस्याहो तेषामर्थञ्च पश्यसि ।
शब्दपाठेऽर्थबोधस्ते सस्पाद्यत्वेन शिष्यते ॥ ४४७ ॥

अर्थे व्याकरणाद्बुद्धे साक्षात्कारोऽवशिष्यते ।
स्यात्कृतार्थत्वधीर्यावत्तावद्गुरुमुपास्स्व भोः ॥ ४४८ ॥

आस्तामेतद्यत्र यत्र सुखं स्याद्विषयैर्विना ।
तत्र सर्वत्र विद्धयेतां ब्रह्मानन्दस्य वासनाम् ॥ ४४९ ॥

विषयेष्वपि लब्धेषु तदिच्छोपरमे सति ।
अन्तर्मुखमनोवृत्तावानन्दः प्रतिबिम्बति ॥ ४५० ॥

श्रुतियुक्त्यनुभूतिभ्यस्स्वप्रकाशचिदात्मके ।
ब्रह्मानन्दे सुप्तिकाले सिद्धे सत्यन्यदा शृणु ॥ ४५१ ॥

यद्ब्रह्मानन्दमयस्सुप्तौ सविज्ञानमयात्मताम् ।
गत्वा स्वप्नं प्रबोधं वा प्राप्नोति स्थानभेदतः ॥ ४५२ ॥

नेत्रे जागरणं कण्ठे स्वप्नस्सुप्तिर्हृदम्बुजे ।
आपादमस्तकं देहं व्याप्य जागर्ति चेतनः ॥ ४५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देहतादात्म्यमापन्नस्तन्मायःपिण्डवत्ततः ।
अहं मनुष्य इत्येवं निश्चित्यैवावतिष्ठते ॥ ४५४ ॥

उदासीनस्सुखी दुःखीत्यवस्थात्रयमेत्यसौ ।
सुखदुःखे कर्मकार्ये त्वौदासीन्यं स्वभावतः ॥ ४५५ ॥

वाह्यभोगान्मनोराज्यात्सुखदुःखे द्विधा मते ।
सुखदुःखान्तरालेषु भवेत्तूष्णीमवस्थितिः ॥ ४५६ ॥

न काऽपि चिन्ता मेऽस्त्यद्य सुखमास इति ब्रुवन् ।
औदासीन्ये निजानन्दभानं वक्त्यखिलो जनः ॥ ४५७ ॥

यावद्यावदहङ्कारो विस्मृतोऽभ्यासयोगतः ।
तावत्तावत्सूक्ष्मदृष्टेर्निजानन्दोऽनुमीयते ॥ ४५८ ॥

सर्वात्मना विस्मृतस्सन्सूक्ष्मतां परमां व्रजेत् ।
अलीनत्वान्न निद्रैषा तमो देहोऽपि नो भवेत् ॥ ४५९ ॥

न द्वैतं भासते नाऽपि निद्रा तत्राऽस्ति यत्सुखम् ।
स ब्रह्मानन्द इत्याह भगवानर्जुनं प्रति ॥ ४६० ॥

शनैश्शनैरुपरमेद्बुद्ध्याधृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥ ४६१ ॥

खानिलाग्निज्वलोर्वण्डलोकप्राणिशिलादिकाः ।
विकाराः प्राणिधीष्वन्तश्चिच्छाया प्रतिविम्बिता ॥ ४६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चेतनाचेतनव्वेषु सच्चिदानन्दलक्षणम् ।
समानं ब्रह्म भिद्येते नामरूपे पृथक् पृथक् ॥ ४६३ ॥

ब्रह्मण्येते नामरूपे पटे चित्रमिव स्थिते ।
उपेक्ष्य नामरूपे द्वे सच्चिदानन्दधीर्भवेत् ॥ ४६४ ॥

प्रथमं सच्चिदानन्दे भासमानेऽथ तावता ।
बुद्धिं नियम्य नैवोर्ध्वं धारयेन्नामरूपयोः ॥ ४६५ ॥

निरुपाधिब्रह्मतत्त्वे भासमाने स्वयंप्रभे ।
अद्वैते द्विपुटी नास्ति भूमानन्दोऽथ उच्यते ॥ ४६६ ॥

एवञ्च निर्जगद्ब्रह्म सच्चिदानन्दलक्षणम् ।
अद्वैतानन्द एतस्मिन्विश्रान्त्यन्तु जनाश्चिरम् ॥ ४६७ ॥

॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

SHASTRA - SIDDHANTA - LESHA - TATPARYA - SANGRAHA :

by the same author . . 6 Annas.

Brahmanhikam . . . . 6 Annas.

Copies can be had of :—

THE TREASURER,

Sri Vasudeva Brahmendra

SARASVATI LIBRARY COMMITTEE.

Palakarai Mutt, Mayavara

or

Pandit T. S. NATESA SASTRIGAL,

Oriental Book-sellers,

MAYAVARAM.

or

From the Publishers.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu